२५
१२

अथ

95
12

ग्रन्थनामः-	"रघुवंशम्"	
कर्तृनामः-	"कालिदासः"	
विषयः-	काव्यम्, Drama	

Raghuvansham.

Kalidas.

2298

(१४)

२५
१२

अथ

"रघुवशम्"

95
12

शिवायनमः

रघुवंसप्ररंभा

95
12

"कालिदासप्रणीतम्"

श्रीगणेशायनमः॥ वागर्थाविवसंप्रक्तौवागर्थप्रतिपत्तये॥ जगतःपितरौव
देपार्वतीपरमेश्वरौ॥१॥ क्वसूर्यप्रभवोवंशःक्वचाल्पविषयामतिः॥ ति
तीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरम्॥२॥ मंदःकवियशःप्रार्थीगमि
ष्याम्युपहास्यतां॥ प्रांशुलभ्येफलेमोहादुद्बाहुरिववामनः॥३॥
अथवाकृतवाग्द्वारेवंशेऽस्मिन्पूर्वसूरिभिः॥ मणौवज्रसमुत्कीर्णे
सूत्रस्येवास्तिमेगतिः॥४॥ सोऽहमाजन्मशुद्धानामाफलोदयक
र्मणां॥ आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥५॥ यथावि

धिहुताग्नीनांयथाकामार्चितार्थिनां॥ यथापराधदंडानांयथाकाल
प्रबोधिनाम्॥६॥ त्यागायसंभृतार्थानांसत्यायमितभाषिणां॥ यशसेवि
जिगीषूणांप्रजायैगृहमेधिनाम्॥७॥ शैशवेऽभ्यस्तविद्यानांयौवनेवि
षयैषिणां॥ वार्द्धकेमुनिवृत्तीनांयोगेनांतेतनुत्यजाम्॥८॥ रघूणाम
न्वयंवक्ष्येतनुवाग्विभवोऽपिसन्॥ तद्गुणैःकर्णमागत्यचापलायप्रचो
दितः॥९॥ तंसंतःश्रोतुमर्हंतिसदसद्व्यक्तिहेतवः॥ हेम्नः
संलक्ष्यतेह्यग्नौविशुद्धिःश्यामिकापिवा॥१०॥ वैवस्वतोमनुर्नाममाननी

र॰घु॰से॰॥

३ं२

यो मनीषिणां॥ आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव॥११॥ तदन्व निर

येशुद्धिमति प्रसूतः शुद्धिमत्तरः॥ दिलीपइतिराजेंदुरिंदुः क्षीरनिधाविव॥१२॥

व्यूढोरस्कोवृषस्कंधः शालप्रांशुर्महाभुजः॥ आत्मकर्मक्षमंदेहं क्षात्रो

॥२॥ धर्मइवाश्रितः॥१३॥ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना॥ स्थि

तः सर्वोन्नतेनोर्वीं क्रांत्वामेरुरिवात्मना॥१४॥ आकारसदृशप्रज्ञः प्र

ज्ञया सदृशागमः॥ आगमैः सदृशारंभः आरंभसदृशोदयः॥१५॥

भीमकांतैर्नृपगुणैः सबभूवोपजीविनां॥ अधृष्यश्चाभिग

॥२॥

वक्रस्यांगतस्यातो नेमिर

मानः प्रभवः स्त्री स्यात्प्रधिमु२॥ अस्यस्तात् १

म्यश्च यादोरत्नैरिवार्णवः॥१६॥ रेखामात्रमपिक्षुण्णादामनोर्वर्त्मनः परं॥

प्रजाःस्यात्संततौजने॥२॥ नव्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः॥१७॥ प्रजानामेवभूत्यर्थं स

ताभ्योबलिमग्रहीत्॥ सहस्रगुणमुत्स्रष्टुमादत्तेहिरसंरविः॥१८॥ सेना

तीक्ष्णं४ परिच्छदस्तस्यद्वयमेवार्थसाधनं॥ शास्त्रेष्वकुंठिताबुद्धिर्मौर्वीधनु

षिचातता॥१९॥ तस्यसंवृतमंत्रस्यगूढाकारेंगितस्यच॥ फलानु युक्तिः२

मेयाः प्रारंभाः संस्काराः प्राक्तनाइव॥२०॥ जुगोपात्मानमत्रस्तो

भेजेधर्ममनातुरः॥ अगृध्नुराददेसोऽर्थमसक्तः सुखमन्वभूत्॥२१॥

रवे१

र०घु०स०॥

३ँ २२

यो मनीषिणां॥ आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव॥११॥ तदन्व

ये शुद्धिमति प्रसूतः शुद्धिमत्तरः॥ दिलीप इति राजेंदुरिंदुः क्षीरनिधाविव॥१२॥ निर

व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः॥ आत्मकर्मक्षमं देहं क्षात्रो

॥२॥ धर्म इवाश्रितः॥१३॥ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना॥ स्थि

तः सर्वोन्नतेनोर्वीं क्रांत्वा मेरुरिवात्मना॥१४॥ आकारसदृशप्रज्ञः प्र

ज्ञया सदृशागमः॥ आगमैः सदृशारंभः आरंभसदृशोदयः॥१५॥ न

[illegible]॥ भीमकांतैर्नृपगुणैः स बभूवोपजीविनां॥ अधृष्यश्चाभिग

॥२॥

वक्रं स्यादंगतस्यातो नेमिर

मान० प्रमर० स्त्री स्यात्प्रधिमुर २॥ अप्रस्यस्तात् १

म्यश्च यादोरत्नैरिवार्णवः॥१६॥ रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं॥

प्रजाः स्यात्संततौ जने॥२॥ न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः॥१७॥ प्रजानामेव भूत्यर्थं स

ताभ्यो बलिमग्रहीत्॥ सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥१८॥ सेना

तीक्ष्णं ४ परिच्छदस्तस्य द्वयमेवार्थसाधनं॥ शास्त्रेष्वकुंठिता बुद्धिर्मौर्वी धनु

षि चातता॥१९॥ तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च॥ फलानु युक्तिर

मेयाः प्रारंभाः संस्काराः प्राक्तना इव॥२०॥ जुगोपात्मानमत्रस्तो

भेजे धर्ममनातुरः॥ अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्॥२१॥

रवे १

र॰वं॰

॥३॥ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः॥ गुणा गुणानुबंधित्वात्तस्य
सप्रसवा इव॥२२॥ अनाकृष्टस्य विषयै र्विद्यानां पारदृश्वनः॥ तस्य धर्मर
तेरासीद्वृद्धत्वं जरसा विना॥२३॥ प्रजानां विनयाधानाद्रक्षणाद्भरणा
दपि॥ स पिता पितरस्तासां केवलं जन्महेतवः॥२४॥ स्थित्यै दंडयतो दं
ड्यान्परिणेतुः प्रसूतये॥ अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः॥ ९३
हर ॥२५॥ दुदोह गां स यज्ञाय सस्याय मघवा दिवं॥ संपद्विनिमयेनोभौ दधतु
र्भुवनद्वयं॥२६॥ न किलानुययुस्तस्य राजानो रक्षितुर्यशः॥ व्याव ॥३॥

अब्ध्यंबुविकृतौ वेला कालमर्यादयोरपि इत्यमरः वेला स्यात्तीरनीरयोरिति विश्वः १

खेयं तु परिखा धारस्त्वंभसां यत्र धारणमित्यमरः॥१

त्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता॥२७॥ द्वेष्योपि संमतः शिष्टस्तस्यार्त्तस्य य
थौषधं॥ त्याज्यो दुष्टः प्रियोप्यासीदंगुलीवोरगक्षता॥२८॥ तं वेधा विदधे
नूनं महाभूतसमाधिना॥ तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः॥२९॥
स वेलावप्रवलयां परिखीकृतसागरां॥ अनन्यशासनामुर्वीं शशासैकपु
रीमिव॥३०॥ तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा॥ पत्नी सुदक्षिणे
त्यासीदध्वरस्येव दक्षिणा॥३१॥ कलत्रवंतमात्मानमवरोधे महत्यपि॥
मासी तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः॥३२॥ तस्यामात्मानुरूपायामात्म

यज्ञः सवोऽध्वरो यागः सप्ततंतुर्मखः क्रतुरित्यमरः॥२ पा

कलत्रं श्रोणिभार्ययोरित्यमरः॥२ पत्नीपाणिगृहीती च द्वितीया सहधर्मिणीत्यमरः २

स्यादगारं भूभुजामंतःपुरं स्यादवरोधनं शुद्धांत

शुद्धांतश्चावरोधश्चेत्यमरः॥२

॥४॥

जन्मसमुत्सुकः ॥ विलंबितफलैः कालं सं निनाय मनोरथैः ॥२३॥ संतानार्थाय
विधये स्वभुजादवतारिता ॥ तेन धूर्जगतो गुर्वी सचिवेषु निवेशिता ॥२४॥
गंगां भगीरथेनेव पूर्वेषां पावनक्षमां ॥२६॥ तां संततिं तेन न्यस्तां मंत्रिषु क्रोश
लो ॥२५॥ अथाऽभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ॥ तौ दंपती वशिष्टस्य
गुरोर्जग्मतुराश्रमं ॥२६॥ स्निग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ ॥
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥२७॥ मा भूदाश्रमपीडेति परिमे
यपुरःसरौ ॥ अनुभावविशेषात्तु सेनापरिवृताविव ॥२८॥ सेव्यमानौ

शतांगः स्यंदनो रथः समनः
पीडा वाधा व्यथा दुःखमित्यमरः ॥२
यापयः जंभा नोदं भावक्षम निपातं प्रतो ४
याया श्रपति श्रजपती दंपती ४

विद्युत् शंपा स्निग्धं मसृणं स्निग्धमित्यमरः ॥२
निम्नं गंभीरमित्यमरः २
मेघः स्तोय पतियो मेघः सप्तरावतं ऊयतेर
स्वान निर्घोष निस्वानाद निस्वनिस्वनाः रुममनः २

वीथ्यालिरावलिः
पंक्तिः श्रेणी

स्त्रियः कुसुमन सः पुष्पं प्रसूनं कुसुमं सममित्यमनः १
केका वाणी मयूरस्येत्यमरः ३ रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्नाना द्वयोरजः सममनः
शीतो मंदः सुगंधश्च त्रिविधं वायुरुवरीजनः १

खा
ले [illegible] स्तुरा
जयअमरः २

अथाप्रत्यर्थे
व्या प्रोसीमा
धे धातुयोग
ओरसमनः ॥

सुखस्पर्शैः शालनिर्यासगंधिभिः ॥ पुष्परेणूत्किरैर्वातैराधूत
वनराजिभिः ॥२९॥ मनोभिरामाः शृण्वंतौ रथनेमिस्वनोन्मुखैः ॥
षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखंडिभिः ॥४०॥ परस्पराक्षिसाद
श्यमदूरो[?]ज्झितवर्त्मसु ॥ मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ॥४१॥
श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं ॥ सारसैः कलनिर्ह्रादैः क्वचि
दुन्नमितानतौ ॥४२॥ पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः ॥ रजो
भिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥४२॥ सरसीष्वरविंदानां [illegible]

सरसीकृतलो १

चिन्हेषु यज्वनां ॥ अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ॥४४॥ हैयंगवीन
मादाय घोषवृद्धानुपस्थितान् ॥ नामधेयानि पृच्छंतौ वन्यानां मार्गशाखि
नां ॥४५॥ सरसीष्वरविंदानां वीचिविक्षोभशीतलं ॥ आमोदमुपजिघ्रं
तौ स्वनिश्वासानुकारिणं ॥४६॥ आप्रादिकुलकम् ॥ कार्य्याभिख्यातयो
रासीद्व्रजतोः शुद्धवेषयोः ॥ हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ॥
॥४७॥ तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः ॥ अपि लंघितमध्वानं बु
बुधे न बुधोपमः ॥४८॥ स दुःप्रापयशाः प्रापदाश्रमं श्रांतवाहनः ॥ सा

अभिख्या नाम सोभ यारिसमनः

पर्नसालोटजोस्त्रियां २

यं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४९॥ वनांतरादुपावृत्तैः स्कंधास
क्त समित्कुसैः ॥ अग्निप्रत्युद्गमात्पूतैः पूर्यमाणं तपस्विभिः ॥५०॥ आ
कीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ॥ अपत्यैरिव नीवारभा
गधेयोचितैर्मृगैः ॥५१॥ सेकांते मुनिकन्याभिस्तत्क्षणोज्झितवृक्ष
कं ॥ विश्वासाय विहंगानामालवालांबुपायिनां ॥५२॥ आतपात्यय
संक्षिप्तनीवारासु निषद्दिभिः ॥ मृगैर्वर्तितरोमंथमुटजांगणभू
मिषु ॥५३॥ अभ्युद्धताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ॥

पर्नसालोटयो
स्त्रियां २

पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः ॥५४॥ कुलकम् ॥ अथ यंतार
मादिश्य धुर्यान्विश्रामयेति सः ॥ तामवारोहयत्पत्नीं रथादवतता
रच ॥५५॥ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः ॥ अर्हणा
मर्हते चक्रुर्मुनयो नयचक्षुषे ॥५६॥ विधेः सायंतनस्यांते स
ददर्श तपोनिधिं ॥ अन्वासीनमरुंधत्या स्वाहयेव हविर्भुजं
॥५७॥ तयोर्जगृहतुः पादौ राजा राज्ञी च मागधी ॥ तौ गुरुर्गुरु

स्वाम्यमात्यसुहृत[redacted]
कोशराष्ट्रदुर्गबलानि च ॥
ति १
हुताशनो जलव्याधि दुर्भिक्षं मरणं तथा
देवमानुषव्य
सनं ततः ॥४

पत्नी प्रीत्या प्रतिननंदतुः ॥५८॥ तमातिथ्यक्रियाशांतरथक्षोभपरिश्र
मं ॥ पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥५९॥ अथाऽथ
र्वविदस्तस्य विजितारिपुरः पुरः ॥ अर्थ्यामर्थपतिर्वाचमाददे व
दतां वरः ॥६०॥ उपपन्नं ननु शिवं सप्तस्वंगेषु यस्य मे ॥ दैवीनां
मानुषीणां च प्रतिहर्ता त्वमापदां ॥६१॥ तव मंत्रकृतो मंत्रैर्दूरा
त्संशमितारिभिः ॥ प्रत्यादिश्यंत इव मे दृष्टलक्ष्यभिदः शराः ॥६२॥ ह
विरावर्जितं होतस्त्वया विधिवदग्निषु ॥ वृष्टिर्भवति सस्यानामँ

अयुक्तेभ्यश्चौ
रेभ्यः परेभ्यो
राजवल्लभात्
पृथिवीपतिलो
भाच्चराणां
पंचधा स्मृता ॥२

प्रत्यादेशो निराकृतिरित्यमरः २

॥७॥ वृष्टिर्वर्षं तद्विघातेऽवग्रहो समौ विति समरः॥१ तेजः पुरीषयोर्वर्चः इत्यमरः॥१
प्रतिर्व्याधिरनावृष्टिः शलभा मूषकाः खगाः॥ प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः २
वेदस्तत्त्वं तपो ब्रह्म इत्यमरः २

वग्रहविशोषिणां॥६३॥ पुरुषायुषजीविन्यो निरातंका निरीतयः॥ यन्म
दीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम्॥६४॥ त्वयैवं चिंत्यमानस्य गुरुणा ब्रह्मयोनिना॥ ह्वयै २
सानुबंधाः कथं न स्युः संपदो मे निरापदः॥
॥६५॥ किं नु वध्वां तवैतस्यामदृष्टसदृशप्रजं॥ न मामवति
सद्वीपा रत्नसूरपि मेदिनी॥६६॥ मत्परं दुर्लभं मत्वा नूनमावर्जितं मया॥ पयः पूर्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते॥६७॥

म ७॥

संघात ग्रासयोः पिंडो द्वयोः पुंसि कलेवरे इत्यमरः॥१

नूनं मत्तः परं वंश्याः पिंडविच्छेददर्शिनः॥ न प्रकामभुजः श्राद्धे स्व
पितृह विद्यानेर धासंग्रहतत्पराः॥६८॥ सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमी
लितः॥ प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥६९॥
लोकांतरसुखं पुण्यं तपोदानसमुद्भवं॥ संततिः शुद्धवंश्या हि
परत्रेह च शर्मणे॥७०॥ असह्यपीडं भगवन्नृणमंत्यमवेहि मे
दर अरुंतुदमिवालानमनिर्वाणस्य दंतिनः॥७१॥ तया हीनं विधातर्मां कथं
पश्यन्न दूयसे॥ सिक्तं स्वयमिव स्नेहाद्वंध्यमाश्रमपादपं॥७२॥

शर्म सातसुखानि च इत्यमरः २ निष्फलं १

२०३० ॥८॥

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी २

तस्माद्यथा विमुच्येऽहं संविधातुं तथार्हसि ॥ इक्ष्वाकूणां दुरापेऽर्थे त्वदधी-
ना हि सिद्धयः ॥७३॥ इत्थं विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ॥
क्षणमात्रमृषिस्तस्थौ सुप्तमीनो यथा ह्रदः ॥७४॥ सोऽपश्य-
त्प्रणिधानेन संततेः स्तम्भकारणं ॥ भवितात्मा भुवो भर्त्तुरथैनं प्र-
त्यबोधयत् ॥७५॥ पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ॥
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥७६॥ इमां देवीमृ-
तुस्नातां स्मरन्वा सपदि सत्वरः ॥ प्रदक्षिणक्रियातीतस्तस्याः कोप-

र्रा

प्रजा स्यात्संततौ जने २

स्रोतोऽम्बुसरणं स्वतः अमरः २

मजीजनः ॥७७॥ अवजानासि मां यस्माद्तस्ते न भविष्यति ॥
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥७८॥ स शापो न त्वया
राजन्न च सारथिना श्रुतः ॥ नदत्याकाशगंगायाः स्रोतस्युद्-
दामदिग्गजे ॥७९॥ अवेहि तदवज्ञानां घ्नापेक्षं मनोरथं ॥
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥८०॥ हविषे दीर्घ-
सत्रस्य सा चेदानीं प्रचेतसः ॥ भुजंगपिहितद्वारं पातालम-

सत्रमाच्छादने यज्ञे सदादानेऽपि च अमरः ॥१

सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः अमरः २

॥६॥
रघुवंस॥

धितिष्ठति ॥८१॥ सुतां मदीयां वत्समातरम् ॥ प्राराधय सपत्नीकः सा वां कामं विधास्यति ॥८२॥ इति वादिन एवास्य होतुराहुतिसाधनं ॥ अनिंद्या नंदिनीनाम धेनुराववृते वनत् ॥८३॥ ताम्राललाटजां लेखां बिभ्रती स्वेतं भंगुरां ॥ संध्या प्रातिपदेनेव प्रतिभिन्नां हिमांशुना ॥८४॥ ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ॥ बिभ्रती श्वेतरोमांकं संध्येव शशि

ला१

स्वेतरक्तस्तु पाटलः ॥१

६ ॥८

उपकंठांतिकाभ्यर्णाभ्यग्राअभ्यमितोऽभ्यंगमासनः ॥२

नं नवं ॥८५॥ भुवं कोष्णेन कुंडोध्नी मेध्येनावभृथादपि ॥ प्रस्रवेनाभिवर्षंती वत्सालोकप्रवर्त्तिना ॥८६॥ रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमंतिकात ॥ तीर्थाभिषेकजां शुद्धिमादधाना महीपतेः ॥८७॥ कुलकम् ॥ तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोधनः ॥ याज्यमाशंसितावंध्यप्रार्थनं पुनरब्रवीत् ॥८८॥ अदूरवर्त्तिनीं सिद्धिं राजन्विगणयात्मनः ॥ उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत् ॥८९॥ वन्यवृत्तिरिमां

८४
नं२

॥१०॥
२०ब

शश्वदात्मानुगमनेन गां ॥ विद्यामभ्यसनेनेव प्रसादयितुमर्
हसि ॥ ९० ॥ प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ॥ नि
षण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ ९१ ॥ वधूर्भक्तिम
ती चैनामर्चितामातपोवनात् ॥ प्रयाता प्रातरन्वेतु सायंप्र
त्युद्व्रजेदपि ॥ ९२ ॥ इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ॥ अ
विघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणां ॥ ९३ ॥ तथेति प्रतिज
ग्राह प्रीतिमान्सपरिग्रहः ॥ आदेशं देशकालज्ञः शिष्यः शा
सितुरानतः ॥ ९४ ॥ अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिं ॥

॥१०॥

॥शिव

सूनुः सूनृतवाक्[illegible]स्रष्टुर्विससर्जोर्जितश्रियं ॥ ९५ ॥ सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ॥ क
ल्पवित्कल्पयामास वन्यामेवास्य संविधां ॥ ९६ ॥ निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रह
द्वितीयः ॥ तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुशशयने निशां निनाय ॥ ९७ ॥ इति श्री रघुवंशे महा
काव्ये कविश्रीकालिदासकृतौ वसिष्ठाश्रमागमनो नाम प्रथमः सर्गः ॥ १ ॥ अथ प्रजानामधिपः प्रभाते जा
याप्रतिग्राहितगंधमाल्यां ॥ वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥ तस्याः खुरन्या
सपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ॥ मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वग
च्छत् ॥ २ ॥ निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ॥ पयोधरीभूतचतुःसमुद्रां जुगोप गोरूप
धरामिवोर्वीं ॥ ३ ॥ व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोप्यनुयायिवर्गः ॥ न चान्यतस्तस्य शरीररक्षा स्ववी
र्यगुप्ता हि मनोः प्रसूतिः ॥ ४ ॥ आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च ॥ अव्याहतस्वैरगतैः

रघुवं
११

स तत्स्याः संम्राट् समाराधनतत्परोभूत् ॥५॥ स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबंधधीरः ॥ जला
भिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥६॥ संन्यस्तचिन्हामपि राज्यलक्ष्मीं तेजोविशेषानुमि
तां दधानः ॥ आसीदनाविष्कृतदानराजिरंतर्मदावस्थ इव द्विपेंद्रः ॥७॥ लताप्रतानोद्ग्रथितैः स केशैरधिज्य
धन्वा विचचार दावं ॥ रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ॥८॥ विसृष्टपार्श्वानुचरस्य
तस्य पार्श्वद्रुमाः पाशभृता समस्य ॥ उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥९॥ मरुत्प्रयु
क्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानं ॥ अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः
॥१०॥ धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः ॥ विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्ता
रफलं हरिण्यः ॥११॥ स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं ॥ शुश्राव कुंजेषु यशः स्व
मुच्चैरुद्गीयमानं वनदेवताभिः ॥१२॥ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधिः ॥
तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे ॥१३॥ शशाम वृष्ट्यापि विना दवाग्निरासीद्विशे ११

णी

षात्फलपुष्पवृद्धिः ॥ ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने ॥१४॥ संचारपूतानि
दिगंतराणि कृत्वा दिनांते निलयाय गंतुं ॥ प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः ॥१५॥
तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ॥ बभौ च सा तेन सतां मतेन श्रद्धेव साक्षा
द्विधिनोपपन्ना ॥१६॥ स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ॥ ययौ मृगाध्यासि
तशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥ आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो
च नरेंद्रः ॥ उभावलंचक्रतुरंचिताभ्यां तपोवनावृत्तिपथं गताभ्यां ॥१८॥ वशिष्ठधेनोरनुयायिनं तमाव प
र्त्तमानं वनिता वनांतात् ॥ पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां ॥१९॥ पुरस्कृता
वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ॥ तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या
॥२०॥ प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ॥ प्रणम्य चानर्च विशालमस्याः शृंगांतरं वि
द्वारमिवार्थसिद्धेः ॥२१॥ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ ॥ भक्त्योप

र॰ वंश॰

१२

भेजे भुजोच्छिन्नरिपुर्निषण्णां॥

पन्नेषु हितद्विधानां प्रसादचिन्हानि पुरःफलानि ॥ २२ ॥ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च
विधिं दिलीपः ॥ दोहावसाने पुरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निवसन्नां ॥ २३ ॥ तामंतिक
न्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ॥ क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनू
दतिष्ठत् ॥ २४ ॥ इत्थं व्रतं पालयतः प्रयार्थं समं महिष्या महनीयकीर्त्तेः ॥ सप्त व्यतीयुस्त्रिगुणानि त
स्य दिनानि दीनोद्धरणोचितस्य ॥ २५ ॥ अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ॥ गं
गाप्रपातांतविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभा
प्रहितेक्षणेन ॥ अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥ २७ ॥ तदीयमाक्रंदितमार्त्तसा
धोर्गुहानिबद्धप्रतिशब्ददीर्घं ॥ रश्मिष्विवादाय नगेंद्रसक्तां निवर्त्तयामास नृपस्य दृष्टिं ॥ २८ ॥ स पाट
लायां गवि तस्थिवांसं धनुर्द्धरः केशरिणां ददर्श ॥ अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः
प्रफुल्लं ॥ २९ ॥ ततो मृगेंद्रस्य मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः ॥ जाताभिषंगो नृपतिर्निषंगादु

र॰ वं॰

१२

द्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥ ३० ॥ वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे ॥ सक्तांगुलिः
सायकपुंखएव चित्रार्पितारंभ इवावतस्थे ॥ ३१ ॥ बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृ
शद्भिः ॥ राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधिरुद्धवीर्यः ॥ ३२ ॥ तमार्यगृह्यं निगृहीतधेनु
र्मनुष्यवाचा मनुवंशकेतुं ॥ विस्माययन्विस्मितमात्मवृत्तौ भूपालसिंहं निजगाद सिंहः ॥ ३३ ॥ अलं म
हीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ॥ न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मा
रुतस्य ॥ ३४ ॥ कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं ॥ अवेहि मां किंकरमष्टमूर्त्तेः कुंभोदरं ना
म निकुंभतुल्यं ॥ ३५ ॥ अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन ॥ यो हेमकुंभस्तननिःसृता
नां स्कंदस्य मातुः पयसां रसज्ञः ॥ ३६ ॥ कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ॥ अ
थैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥ ३७ ॥ तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्
मिन्नहमद्रिकुक्षौ ॥ व्यापारितः शूलभृता विधाय सिंहत्वमंकागतसत्ववृत्ति ॥ ३८ ॥ तस्यालं

शिवेन १

मेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधे
धेव ३९ स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः शस्त्रेण रक्ष्यं यदश-
क्यरक्ष्यं न तद्यशः शस्त्रभृतां क्षिणोति ४० इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ४१ प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे
वितथप्रयत्नः जडीकृतस्त्र्यम्बकवीक्षितेन वज्रं मुमुक्षन्निव वज्रपाणिः ४२ संरुद्धचेष्टस्य मृगेन्द्र का-
मं हास्यं वचस्तद्यदहं विवक्षुः अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये ४३ मान्यः
श स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं
४४ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनु-
रियं महर्षेः ४५ अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् भूयः स भूतेश्व-
रपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६ एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं व- शिव

एकातपत्रं कोर्थः एकच्छत्रं नाम ...

पुश्च अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वं ४७ भूतानुकम्पा तव चेदियं
गौरेका भवेत्स्वस्तिमती त्वदन्ते जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ४८
अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि शक्योऽस्य मन्युर्भवता विनेतुं गाः को-
टिशः स्पर्शयता घटोध्नीः ४९ तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहं मही-
तलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ५० एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य
गुहागतेन शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ५१ निशम्य देवानुचर-
स्य वाचं मनुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः
५२ क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः राज्येन किं तद्विपरीतवृत्तेः प्राणैरु-
पक्रोशमलीमसैर्वा ५३ कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां इमामनूनां
सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां ५४ सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोच

र.वं.श.
१४

यितुं भवन्तः न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ५५ भवानपीदं पर
वानवैति महान्हि यत्नस्तव देवदारौ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वय
मक्षतेन ५६ किमप्यहिंस्यस्तव चेन्मतोहं यशःशरीरे भव मे दयालुः एकांतविध्वंसिषु
मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ५७ संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगत
योर्वनांते तद्भूतनाथानुग नार्हसि त्वं संबंधिनो मे प्रणयं विहंतुं ५८ तथेति गामुक्तवते दिली
पः सद्यः प्रतिष्टंभविमुक्तबाहुः सन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ५९
तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् अवाङ्मुखस्योपरि पुष्प
वृष्टिः पपात विद्याधरहस्तमुक्ता ६० उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमु
त्थितः सन्॥ ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ६१ तं विस्मितं धेनुरुवाच
साधो मायां मयोद्भाव्य परीक्षितोसि ऋषिप्रभावान्मयि नांतकोपि प्रभुः प्रहर्तुं किमुतान्य

१४

वत्सस्य होमार्थविधेश्च शेषं

न्यहिंस्रः भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते पुत्र वरं वृणीष्व न केवलानां पयसां प्र
सूतिमवेहि मां कामदुघां प्रसन्नाम् ॥ ६३ ततः समानीय समानितार्थी हस्तौ स्वहस्ता
र्जितवीरशब्दः वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ॥ ६४ संता
नकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ॥ दुग्ध्वा पयः पत्रपुटे मदीयं
पुत्रोप भुंक्ष्वेति तमादिदेश ॥ ६५ ॥ वत्साग्निकार्यव्यतिरिक्तमन्ये दुरोरनुज्ञामधि
गम्य मातः ॥ औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥ ६६ ॥ इत्थं
क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव तदन्विता हैमवताच्च कुक्षेः
प्रीत्या पयावाश्रमम् भ्रमेताः ६७ तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे नि
५० वेद्य प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ६८ स नंदिनीस्तन्य

रघु
वंश.
॥१५॥

मनिंदितात्मासहतस्तेनवत्सानिपीतशेषं ॥ पपौवशिष्ठेनकृताभ्यनुज्ञः स शुद्धयशोमूर्त
मिवातितृष्णः ॥६९॥ प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकंस्वस्त्ययनंप्रयुज्य तौदंपतीस्वां
प्रतिराजधानी संप्रेषयामासवशीवसिष्ठः ॥७०॥ प्र[redacted]दक्षिणीकृत्यहुतंहुताशमनंतरंभ
र्तुररुंधतींच ॥ धेनुंसवत्सांचनृपःप्रतस्थे सन्मंगलोदग्रतरप्रभावः ॥७१॥ [redacted]श्रोत्राभि
रामध्वनिनारथेनसधर्मपत्नीसहितःसहिष्णुः [redacted] ययावनुद्घातसुखेन
मार्गं स्वेनेवपूर्णेनमनोरथेन ॥७२॥ तमाहितौत्सुक्यमदर्शनेनप्रजाःप्रजार्थव्रतकर्शितांगं
नेत्रैःपपुस्तृप्तिमनाप्नुवद्भिर्नवोदितंनाथमिवौषधीनां ॥७३॥ पुरंदरश्रीःपुरमुत्पताकंप्रवि
श्यपौरैरभिनंद्यमानः भुजेभुजंगेंद्रसमानसारेभूयःसभूमेर्धुरमाससंज ॥७४॥ अथ
नयनसमुत्थंज्योतिरत्रेरिवद्यौः सुरसरिदिवतेजोवह्निनिष्ठ्यूतमैशं नरपतिकुलभू
त्यैगर्भमाधत्तराज्ञी गुरुभिरभिनिविष्टंलोकपालानुभावैः ॥७५॥ इतिश्रीरघुवंशेमहाकाव्येकवि
श्रीकालिदासकृतौनंदनीवरप्रदानोनामद्वितीयःसर्गः ॥२॥ अथेप्सितंभर्तुरुपस्थितोदयं स
खीजनोद्वीक्षणकौमुदीमुखम् निदानमिक्ष्वाकुकुलस्यसंततेःसुदक्षिणादौहृदलक्षणंदधौ
१ ततो विशांपत्युरनन्यसंततेर्मनोरथंकिंचिदिवोदयोन्मुखम् अनन्यसौहार्दरसस्यदोहदं
प्रियाप्रपेदेप्रकृतिप्रियंवदा २ मुखेनसाकेतकपत्रपांडुनाकृशांगयष्टिःपरिमेयभूषणा स्थि
तात्पतारा भरसोंदुमंडलांप्रभातकल्पांरजनीं व्यडंवयत् ३ शरीरसादादसमग्रभूषणामुखेनसाद
क्ष्यतलोध्रपांडुना तनुप्रकाशेनविचेयतारकाप्रभातकल्पाशशिनेवशर्वरी ४ तदाननंमृत्सुरभिक्षि
तीश्वरोरहःस्युपाघ्रायनतृप्तिमाययौ करीवसिक्तंपृषतैःपयोमुचांशुचिव्यपायेवनराजिपल्वलं
५ दिवंमरुत्वानिवभोक्ष्यतेभुवंदिगंतविश्रांतरथोहितत्सुतः अतोऽभिलाषेप्रथमंतथाविधेमनोबबंधा
न्यरसान्विलंघ्यसा ६ नमेह्रियाशंसतिकिंचिदी[redacted]प्सितंस्पृहावतीवस्तुषुकेषुमागधी इतिस्मपृच्छ

रघु
१५

रघुवं.
१६

त्यन्वेत्यमाहृतः प्रियासखीरुत्तरकोशलेश्वरः ७ उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदा
हृतं न हीष्टमस्य त्रिदिवेपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ८ क्रमेण निस्तीर्य च दोहदव्यथां
प्रचीयमानावयवा रराज सा पुराणपत्रापगमादनंतरं लतेव सन्नद्धमनोज्ञपल्लवा ९ दिनेषु ग
च्छत्सु मधूकपांडुरं तदीयमास्यामममखेस्तनद्वयं सुजातयोः पंकजकोशयोः श्रियेतिरश्चकार भ्रमराभिलीनयोः
९ दिनेषु गच्छत्सु नितांतपीवरं तदीयमानीलमुखं स्तनद्वयं निधानगर्भामिव सागरांबरां शमीमिवाभ्यंतर
लीनपावकां नदीमिवांतःसलिलां सरस्वतीं नृपः ससत्वां महिषीममन्यत ११ प्रियानुरागस्य मनःस
मुन्नतेर्भुजार्जितानां च दिगंतसंपदां यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः सदृशीर्व्यधत्त सः
१२ सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः तयोपचारांजलिखिन्नहस्तया ननं
दपारिप्लवनेत्रया नृपः १३ कुमारभृत्याकुशलैरधिष्ठिते भिषग्भिराप्तैरथ गर्भवेश्मनि पतिः प्र
तीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव १४ ग्रहैस्ततः पंचभिरुच्चसंश्रयैरसू

१६

र्यगैः सूचितभाग्यसंपदं असूत पुत्रं समये शची समा त्रिसाधना शक्तिरिवार्थमक्षयं १५ दिशः प्र
सेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे बभूव सर्वं शुभशंसि तत्क्षणे भवो हि लोका
भ्युदयाय तादृशां १६ अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा निशीथदी
पाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव १७ जनाय शुद्धांतचराय शंसते कुमारजन्मा
मृतसंमिताक्षरं अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे १८ निवातपद्मस्ति
मितेन चक्षुषा नृपस्य कांतं पिबतः सुताननं महोदधेः पूर इवेंदुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्म
नि १९ स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते दिलीपसूनुर्मणिराकरो
द्भवः प्रयुक्तसंस्कार इवाधिकं बभौ २० सुखश्रवा मंगलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वा
रयोषितां न केवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौकसामपि २१ न संयतस्तस्य

वभूव रक्षितुर्विमोचयेद्यं सुतजन्महर्षितः २२ ऋणाभिधानात्स्वयमेव केवलं तदापि तॄणां मुमुचे स बंध
नात् २२ श्रुतस्य यायादयमंतमर्भकस्तथा परेषां युधि चेति पार्थिवः अवेक्ष्य धातोर्गमनार्थम
र्थविच्चकार नाम्ना रघुमात्मसंभवं २३ पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दि
२४ नेदिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्रमाः २४ उमावृषांकौ श
रजन्मना यथा यथा जयंतेन शचीपुरंदरौ तथा नृपः सा च सुतेन मागधी ननंदतुस्तत्स
दृशेन तत्समौ २५ रथांगनाम्नोरिव भावबंधनं बभूव यत्प्रेम परस्पराश्रयं विभक्तमप्ये
कसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत २६ उवाच धात्र्या प्रथमोदितं वचो ययौ
तदीयामवलंब्य चांगुलिं अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोर्भकः

२७ तमंकमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि उपांतसंमीलितलोचनो नृप
श्चिरात्सुतस्पर्शरसज्ञतां ययौ २८ अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमंत
मन्वयं स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः २९ स वृत्तचूडश्चल
काकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव स
मुद्रमाविशत् ३० अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियं अवंध्ययत्ना
श्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ३१ धियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुरर्णवोपमाः ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्व
रः ३२ त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवित् न केवलं तद्गुरुरेक

१८

पार्थिवः क्षितावभूदेकधनुर्द्धरोपि सः ३३ महोक्षतां वत्सतरः स्पृशन्निव द्विपेंद्रभावं कलभः श्र

यन्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ३४ अथास्य गोदान

विधेरनंतरं विवाहदीक्षां निरकारयद्गुरुः नरेंद्रकन्यास्तमवाप्य सत्पतिं तमोपहं दक्षसुता इ

वाबभुः ३५ युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः वपुःप्रकर्षादज

यद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३६ ततः प्रजानां चिरमात्मना धृतां नितांत

गुर्वीं लघुयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्

३७ नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितं अगच्छदंशेन गुणाभिला

षिणी नवावतारं कमलादिवोत्पलं ३८ विभावसुः सारथिनेव वायुना घनव्यपायेन

गभस्तिमानिव बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ३९ नियु

१८

ज्य तं होमतुरंगरक्षणे धनुर्द्धरं राजसुतैरनुद्रुतं अपूर्णमेकेन शतक्रतूपमः शतं क्रतू

नामपविघ्नमाप सः ४० अतः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्र

त एव रक्षतां जहार शक्रः किल गूढविग्रहः ४१ विषादलुप्तप्रतिपत्ति विस्मितं कुमार

सैन्यं सपदि स्थितं च तत् वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेथ नंदिनी ४२

तदंगनिष्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः स

तां अतींद्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनंदनः ४४ स पूर्वतः पर्वतप

क्षशातनं ददर्श देवं नरदेवसंभवः पुनः पुनः सूतनिषिद्धचापलं हरंतमश्वं रथरश्मि

संयतं ४५ शतैस्तमक्ष्णामनिमेषवृत्तिभिः हरिं विदित्वा हरिभिश्च वाजिभिः अवो

चदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ४६ मखांशभाजां प्रथमो मनी

विभिः त्वमेव देवेन्द्र यतो निगद्यसे अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे
४६ त्रिलोकनाथेन सतां मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा स चेत्स्वयं कर्मसु धर्मचारि
णां त्वमन्तरायो भवसि च्युतो विधिः ४७ तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्ह
सि पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिं ४८ इति प्रगल्भं रघुणा समीरि
तं वचो निशम्याधिपतिर्दिवौकसां निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरं
४९ यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः जगत्प्रकाशं तदशेषमिज्य
या भवद्गुरुर्लंघयितुं ममोद्यतः ५० हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव ना
परः तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एव नः ५१ अतोऽयमश्वः कपिलानुका
रिणा पितुस्त्वदीयस्य मयापहारितः अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संत
तेः ५२ ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता गृहाण शस्त्रं यदि सर्ग एष

ते न खल्वनिर्जित्य रघुं कृती भवान् ५३ स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरास
नं अतिष्ठदालीढविशेषशोभिना वपुः प्रकर्षेण विडंबितेश्वरः ५४ रघोरवष्टंभमयेन पत्रिणा ह
दि क्षतो गोत्रभिदप्यमर्षणः नवांबुदानीकमुहूर्तलांछने धनुष्यमोघं समधत्त मार्गणं ५५ दि
लीपसूनोः स बृहद्भुजांतरं प्रविश्य भीमासुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः कुतूह
लेनेव मनुष्यशोणितं ५६ हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशांगुलौ भुजे
शचीपत्रलताक्रियोचिते स्वनामचिह्नं निचखान सायकं ५७ जहार चान्येन मयूरपत्रिणा
शरेण शक्रस्य महाशनिध्वजं चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ५८
तयोरुपांतस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोरधोमु
खैरूर्ध्वमुखैश्च पत्रिभिः ५९ अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुःप्रसहस्य तेजसः शशाक निर्वापयि
तुं मनं वासवः स्वतश्च्युतं वह्निमिवाद्भिरंबुदः ६० ततः प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णवधी

रघुवंश. २.

रता दिनैं रघोः शशांकार्धमुखेन पत्रिणा शरासनज्यामलुनाद्विडौजसः सचापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ६२ रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः ६३ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ६४ असंगमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधं अवेहि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ६५ ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिं नरेंद्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ६६ अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यतां ६७ यथा च वृत्तांतमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणोति देवेश तथा विधीयतां ६८ तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ

२.

नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ६९ तमभ्यनंदत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः परामृशन्हर्षजडेन पाणिना तदीयमंगं कुलिशव्रणांकितं ७० इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ७१ अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्वा यूने सितातपवारणं मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतं ७२ ॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ रघुसंभूतिर्नाम तृतीयः सर्गः ॥ स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ॥ दिनांते निहितं तेजः सवित्रेव हुताशनः १ न्यस्तशस्त्रं दिलीपं च तं च शुश्रुवुषां पतिं राज्ञो मुक्तनाराचे हृदि शल्यमिवार्पितं २ दिलीपानंतरं राज्ये तं निशम्य प्रतिष्ठितं पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ३ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः नवाभ्युत्थानदर्शिन्यो नेमुः

तिर

दुःसहप्रजाः प्रजाः ४ समेव समाक्रान्तं द्वयं द्विरदगामिना तेन सिंहासनं पित्र्यमखिलं चारिमण्डलं ५ पर्या-
मराड्ललक्ष्येणातेन महस्याकिल्स्वयं पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितं ६ परिकल्पितसान्नि-
ध्या काले काले च वन्दिषु स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ७ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्य-
पि राजभिः तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ८ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं पूर्व एवा-
भवत्पक्षस्तस्मिन्नाभवदुत्तरः ९ सर्वत्र सर्वस्य लोकस्य युक्तदण्डतया मनः आददे नातिशीतोष्णो न-
भस्वानिव दक्षिणः १० मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ फलेन सहकारस्य पुष्पोद्गम इव प्र-
जाः ॥१०॥ पक्षो नाममपि भूतानां गत्वा वै पुपुवर्गुणाः ॥ न बतास्मिन्महीपाले सर्वं न्यवर्तिवा प्रवर्तत् ॥११॥
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ॥ तथैव सोभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥१२॥ कामं कर्णा-
न्तविश्रान्ते विशाले तस्य लोचने ॥ चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥१३॥ लब्धप्रशमनस्व-
स्थमथैनं समुपस्थिता ॥ पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥१४॥ निर्वृष्टलघुभिर्मेघैर्मुक्त-

वर्त्मा सुदुःसहः ॥ प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः ॥१५॥ वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्द-
धौ ॥ प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥१६॥ अधिज्यमायुधं कर्तुं समयोयं रघोरिति
स्वधनैः शंकितेनेव संजहे शतमन्युना ॥१७॥ पुण्डरीकातपत्रस्तं विकसत्काशचामरः ॥ ऋतुर्वि-
डम्बयामास न पुनः प्राप तच्छ्रियं ॥१८॥ प्रसादसुमुखे तस्मिन्चंद्रे च विशदप्रभे ॥ तदा चक्षुष्मतां प्रीति-
रासीत्समरसा द्वयोः ॥१९॥ हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ॥ विभूतयस्तदीयानां पर्यस्ता
यशसामिव ॥२०॥ इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयं ॥ आकुमारकथोद्घातं शालिगोप्यो जगु-
र्यशः ॥२१॥ प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ॥ रघोः परिभवाशंकि चुक्षुभे द्विषतां मनः ॥
२२॥ मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ॥ लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं ॥
२३॥ प्रसवैः सप्तपर्णानां मदगंधिभिराहताः ॥ असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥२४॥ सरि-
तः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ॥ यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत् ॥२५॥ तस्मै सम्यक्-

रघुवंस

२२

हुतो वह्निर्वाजिनीराजनाविधौ॥ प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ॥२५॥ स गुप्तमूलप्रत्यं-
तः शुद्धपार्ष्णिरयान्वितः॥ षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥२६॥ अवाकिरन्वयोवृद्धा-
स्तं लाजैः पौरयोषितः॥ पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतं॥२७॥ स ययौ प्रथमं प्राचीं तुल्यः
प्राचीनवर्हिषा॥ अहितानानिलोद्धूतैस्तर्जयन्निव केतुभिः॥२८॥ रजोभिः स्यंदनोद्धूतै-
र्गजैश्च घनसन्निभैः॥ भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं॥३०॥ पुरोगैः कलुषास्तस्य
सहप्रस्थायिभिः कृशाः॥ पश्चात्प्रयायिभिः पंकाश्चक्रिरे मार्गनिम्नगाः॥३१॥ मरुपृष्ठान्युदंभां-
सि नाव्याः सुप्रतरा नदीः॥ विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः॥३२॥ प्रतापोऽग्रे ततः शब्दः पु-
रागस्तदनंतरं॥ ययौ पश्चाद्रथानीकं चतुःस्कंधेव सा चमूः॥३३॥ स सेनां महतीं कर्षन्पूर्वसा-
गरगामिनीं॥ बभौ हरजटाभ्रष्टां गंगामिव भगीरथः॥३४॥ त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा
नृपैः॥ तस्यासीदुल्बणो मार्गः पादपैरिव दंतिनः॥३५॥ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्ज-

२४

नपदाञ्जयी॥ प्राप तालीवनश्याममुपकंठं महोदधेः॥३६॥ अनम्राणां समुद्धर्तुस्तस्मा-
त्सिंधुरयादिव॥ आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीं॥३७॥ वंगानुत्खाय तरसा नेता
नौसाधनोद्यतान्॥ निचखान जयस्तंभान्गंगास्रोतोंतरेषु सः॥३८॥ आपादपद्मप्रणताः
कलमा इव ते रघुं॥ फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः॥३९॥ स तीर्त्वा कपिशां सैन्यैर्ब-
द्धद्विरदसेतुभिः॥ उत्कलादर्शितपथः कलिंगाभिमुखो ययौ॥४०॥ स प्रतापं महेंद्रस्य मूर्ध्नि ती-
क्ष्णं न्यवेशयत्॥ अंकुशं द्विरदस्येव यंता गंभीरवेदिनः॥४१॥ प्रतिजग्राह कालिंगस्तमस्त्रै-
र्गजसाधनः॥ पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः॥४२॥ द्विषां विषह्य काकुत्स्थस्त-
त्र नाराचदुर्दिनं॥ सन्मंगलस्नात इव प्रतिपेदे जयश्रियं॥४३॥ वायव्यास्त्रविनिर्धूतात्तस्मा-
द्विद्राव्य वोदधेः॥ गजानीकोत्सेकाल्लीनं ताक्ष्र्यः सर्पानिवाददे॥४४॥ तांबूलीनां दलैस्तत्र र-
चितापानभूमयः॥ नारिकेलासवं योधाः शात्रवं च पपुर्यशः॥४५॥ गृहीतप्रतिमुक्तस्य स धर्मवि-

२३

जयी नृपः ॥ श्रियं महेन्द्रनाथस्येव जम्भारेर्मनुमेदिनी ॥ ४६ ॥ ततो वेलातटेनैव फलवत्पूगशोभिना
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४७ ॥ स सैन्यपरिभोगेन गजदानेन सुगंधिना ॥ का
वेरीं सरितां पत्युः शंकनीयामिवाकरोत् ॥ ४८ ॥ भयोत्सृष्टविभूषाणां तेन केरलयोषितां ॥ अलके
षु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ४९ ॥ बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ॥ मारीचोद्भ्रां
तहारीता मलयाद्रेरुपत्यकाः ॥ ५० ॥ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ॥ तुल्यगंधिषु मत्त
भेकटेषु फलरेणवः ॥ ५१ ॥ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं ॥ नास्रसत्करिणां ग्रैवं त्रिपदीछे
दिनामपि ॥ ५२ ॥ दिशि मंदायते तेजो दक्षिणस्यां रवेरपि ॥ तस्यामेव रघोः पांड्याः प्रतापं न
विषेहिरे ॥ ५३ ॥ ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ॥ ते निपत्य ददुस्तस्मै यशः स्वमिव सं
चितं ॥ ५४ ॥ स निर्विश्य यथाकामं तटेष्वालीनचंदनौ ॥ स्तनाविव दिशस्तस्याः शैलौ मलयद
र्दुरौ ॥ ५५ ॥ असह्यविक्रमः सह्यं दूरमुक्तमुदन्वता ॥ नितंबमिव मेदिन्याः स्रस्तांशुकमलंघ

यत ॥ ५७ ॥ युग्मं ॥ तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः ॥ रामा स्त्रोत्सारितोप्यासीत्सह्यलग्न इवार्ण
वः ॥ ५८ ॥ मुरलामारुतोद्धूतमगमत्कैतकं रजः ॥ तद्योधवारबाणानामयत्नपटवासतां ॥ ५९ ॥ ख
र्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु ॥ कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥ ६० ॥ अभ्यभू
यत वाहानां चरतां गात्रसिंजितैः ॥ वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ६१ ॥ अवकाशं किलोदन्वा
न्रामायाभ्यर्थितो ददौ ॥ अपरांतमहीपालव्याजेन रघवे करं ॥ ६२ ॥ मत्तेभरदनोत्कीर्णव्यक्त
विक्रमलक्षणं ॥ त्रिकूटमेव तत्रोच्चैर्जयस्तंभं चकार सः ॥ ६३ ॥ पारसीकांस्ततो जेतुं प्रतस्थे स्थल
वर्त्मना ॥ इंद्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६४ ॥ यवनीमुखपद्मानां सेहे मधुमदं न
सः ॥ बालातपमिवाब्जानामकालजलदोदयः ॥ ६५ ॥ संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६६ ॥ भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीं ॥
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६७ ॥ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ॥

रघुवंश.

प्रारीपातप्रतीकारः संरंभो हिमवानिव ॥६८॥ विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमं। आस्ती
र्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥६९॥ ततः प्रतस्थे कौवेरीं भास्वानिव रघुर्दिशं। शरैरुस्रै
रिवोदीच्यानुद्धरिष्यन् रसानिव ॥७०॥ जितान्नजय्यतानेव कुलीनरथपुरःसरान् ॥ महार्णवमिवौर्वा
ग्निः प्राविवेशोत्तरां दिशं ॥७१॥ विनीताध्वश्रमास्तस्य सिंधुतीरविचेष्टनैः। दुधुवुर्वाजिनः
स्कंधांल्लग्नकुंकुमकेसरान् ॥७२॥ तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमं। कपोलपाटला
देशि बभूव रघुचेष्टितं ॥७३॥ कांबोजाः समरे सोढुं तस्य वीर्यमनीश्वराः। गजालानपरि
क्लिष्टैरक्षोटैः सार्द्धमानताः ॥७४॥ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः। उपदा विविशु
स्त्विशं नोत्सेकाः कोसलेश्वरं ॥७५॥ ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः। वर्द्ध
यन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥७६॥ शशंस तुल्यसत्वानां सैन्यघोषेप्यसंभ्रमं। गुहा
शयानां सिंहानां परिवृत्यावलोकितं ॥७७॥ भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः

२४

गंगासीकरिणो मार्गे मरुतस्तं सिषेविरे ॥७८॥ विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनि
काः। दृषदो वासितोत्संगा निषण्णमृगनाभिभिः ॥७९॥ सरलासक्तमातंगग्रैवेयस्फुरित
त्विषः। आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥८०॥ तस्योत्सृष्टनिवासेषु कंठरज्जुक्ष
तत्वचः। गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥८१॥ तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत्। ना
राचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ॥८२॥ शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान्। ज
योदाहरणं बाह्वोर्गापयामास किन्नरान् ॥८३॥ परस्परेण विज्ञातस्तेषूपायनपाणिषु। राज्ञा हि
मवतः सारो राज्ञः सारो हिमाद्रिणा ॥८४॥ तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः। पौलस्त्य
तुलितस्याद्रेरादधान इव ह्रियं ॥८५॥ चकंपे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः। तद्गजाला
नतां प्राप्तैः सह कालागुरुद्रुमैः ॥८६॥ न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनं। रथवर्त्मरजोप्यस्य कु
त एव पताकिनीं ॥८७॥ तमीशः कामरूपाणामत्याखंडलविक्रमं। भेजे भिन्नकटैर्नागैरन्यानुप

रघुवंस २५

रुरोध यैः॥८३॥ कामरूपेश्वरस्तस्य हेमपीठाधिदेवतां॥ रत्नपुष्पोपहारेण छायामानर्च पादयोः
॥८४॥ इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतं॥ रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु॥८५॥ स
विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणं॥ आदानं हि विसर्गाय सतां वारिमुचामिव॥८६॥ सत्रांते सचिवस
खः पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान्॥ काकुत्स्थश्चिरविरहोत्सुकावरोधान्राज
न्यान्स्वपुरनिवृत्तयेऽनुमेने॥८७॥ ते रेखाध्वजकुलिशातपत्रचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यं॥
प्रस्थानप्रणतिभिरंगुलीषु चक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं॥८८॥ अयशांतेतं मवमधासि
सेकूस्तं सत्कारैः शामितपराजयव्यलीकाः॥ आमंत्र्यौ स्वकवनिता नितांतसस्पृहास्ता नि स्वान्यवानि
सृजे पुरा सीज गम्युः॥ इति श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृतौ दिग्विजयो नाम चतुर्थः सर्गः ४

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं॥ उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रप
दे वरतंतुशिष्यः॥१॥ स मृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः॥ श्रुतप्रकाशं य २५

शसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः॥२॥ तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानध
नाग्रयायी॥ विशांपतिर्विष्टरभाजमारात्कृतांजलिः कृत्यविदित्युवाच॥३॥ अप्यग्रणीर्मं
त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते॥ यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णदीधि
तेः॥४॥ कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि॥ आपाद्यते न व्ययमंतरायैः क
च्चिन्महर्षेस्त्रिविधं तपस्तत्॥५॥ आधारबंधप्रमुखैः प्रयत्नैः संवर्द्धितानां सुतनिर्विशेषं॥ कच्चिन्न
वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानां॥६॥ क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मु
निभिः कुशेषु॥ तदंकशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः॥७॥ निवर्त्यते यैर्निय
माभिषेको येभ्यो निवापांजलयः पितॄणां॥ तान्युंछषष्ठांकितसैकतानि शिवानि वस्तीर्थजलानि
कच्चित्॥८॥ नीवारपाकादि कडंगरीयैरामृश्यते जानपदैर्न कच्चित्॥ कालोपपन्नातिथिकल्प्यभाग

रघुवं. २६

गां त्रि ४

न्यं शरीरस्थितिसाधनं व ॥९॥ अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ॥ का
लो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥१०॥ तवार्हतो नाभिगमेन तृप्तं मनो नियोग
क्रिययोत्सुकं मे ॥ अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्मां ॥११॥ इत्यर्घ्य
पात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ॥ स्वार्थोपपत्तिं प्रति दुर्बलाशस्तं प्रत्यवोचद्वरतंतुशि.
ष्यः ॥१२॥ सर्वत्र नो वार्त्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानां ॥ सूर्ये तपत्यावरणाय दृष्टेः क
ल्पेत लोकस्य कथं तमिस्रा ॥१३॥ भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे ॥ व्यती
तकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥१४॥ शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि ती
र्थप्रतिपादितर्द्धिः ॥ आरण्यकोपात्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः ॥१५॥ स्थाने भवा
नेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ॥ पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो श्री व
हि वृद्धेः ॥१६॥ तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ॥ स्वस्त्यस्तु ते निर्गलितां २६

~~तथेति तस्यावितथां प्रतीतः प्रत्यग्रहीत्संगिरमग्रजन्मा ॥~~

बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥१७॥ एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ॥
किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्त ॥१८॥ ततो यथावद्विहिताध्वराय तस्मै स्मयावे
शविवर्जिताय ॥ वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥१९॥ समाप्तविद्येन मया महर्षि
र्विज्ञापितोऽभूद्गुरुदक्षिणायै ॥ स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥२०॥
निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः ॥ वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो
दश चाहरेति ॥२१॥ सोऽहं सपर्याविधिभाजनेन मत्वा भवंतं प्रभुशब्दशेषं ॥ अभ्युत्सहे संप्रति नोपरोद्धु
मल्पेतरत्वाच्छ्रुतिनिष्क्रयस्य ॥२२॥ इत्थं द्विजेन द्विजराजकांतिरावेदितो वेदविदां वरेण ॥ एनोनिवृ
त्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥२३॥ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य का
मं ॥ गतो वदान्यांतरमित्ययं मे मा भूत्परीवादनवावतारः ॥२४॥ स त्वं प्रशस्ते महिते मदीये वसं १०
श्चतुर्थोऽग्निरिवाग्न्यगारे ॥ द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थं ॥२५॥
॥ तथेति तस्यावितथां प्रतीतः प्रत्यग्रहीत्संगिरमग्रजन्मा ॥ गामात्तसारां रघुरप्यवेक्ष्य निष्क

रघु.
३०

स्रष्टुं मयेच्चकमेकुवेरात्॥२६॥ वाशिष्ठमंत्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु॥ मरुत्सख
स्येव वलाहकस्य गतिर्विजघ्ने नहितद्रथस्य॥२७॥ अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितश
स्त्रगर्भं॥ सामंतसंभावनयैव धीरः कैलाशनाथं तरसा जिगीषुः॥२८॥ प्रातः प्रयाणाभिमुखाय तस्मै स
विस्मयाः कोशगृहे नियुक्ताः॥ हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः॥२९॥ तं भू
पतिर्भासुरहेमराशिं लब्धं कुवेरादभियास्यमानात्॥ दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव
वज्रभिन्नं॥३०॥ जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यसत्वौ॥ गुरुप्रदेयाधिकनिस्पृहो
र्थी कामादधिकप्रदश्च॥३१॥ अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः॥ स्पृशन्क
रेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः॥३२॥ किमत्र चित्रं यदि कामसूर्भुर्वृत्ते स्थित
स्याधिपतेः प्रजानां॥ अचिंतनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा॥३३॥ आशास्य
मन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते॥ पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भ
वतः पितेव॥३४॥ इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशं॥ राजापि लेभे सुत

३०

माशु तस्मादालोकमर्कादिव जीवलोकः॥३५॥ ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषु
वे कुमारं॥ अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार॥३६॥ रूपं तदोजस्वि तदेव वी
र्यं तदेव नैसर्गिकमुन्नतत्वं॥ न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्॥३७॥
उपात्तविद्यं विधिवद्गुरुभ्यः तं यौवनोद्भेदविशेषकांतं॥ श्रीर्गंतुकामापि गुरोरनुज्ञां धीरेव कं
न्या पितुराचकांक्षे॥३८॥ अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिंदुमत्याः॥ आप्तः कु
मारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः॥३९॥ तं श्लाघ्यसंबंधमसौ विचिंत्य दारक्रिया
योग्यदशं च पुत्रं॥ प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीं॥४०॥ तस्योपकार्या
रचितोपचारा वन्येतरा जानपदोपदाभिः॥ मार्गे निवासा मनुजेंद्रसूनोर्वभूवुरुद्यानविहा
रकल्पाः॥४१॥ स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले॥ निवेशयामास विलं
घिताध्वा क्लांतं रजोधूसरकेतु सैन्यं॥४२॥ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितांतःस
लिलप्रवेशः॥ निर्धौतदानामलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज॥४३॥ निःशेषविक्षा

रघुवंस लितधातुनापि वप्रक्रियामृक्षवतस्तटेषु ॥ नीलोर्ध्वरेखाशबलेन शंसन्दंतद्वयेनाश्मविकुंठि
२८ तेन ॥ ४४ ॥ युग्मं ॥ संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं ॥ बभौ स भिंदन्बृहतस्त ७१
रंगान्वार्यर्गलाभंग इव प्रवृत्तः ॥ ४५ ॥ शैलोपमः शैवलमंजरीणां जालानि कर्षन्नुरसा स पश्चात्
पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ॥ ४६ ॥ तस्यैकनागस्य कपोलभित्त्यो
हृदावगाहक्षणमात्रशांता वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ॥ ४७ ॥ स
प्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं ॥ विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा
विमुखीबभूवुः ॥ ४८ ॥ स च्छिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन ॥ रामापरित्राण
विहस्तयोधं सेनानिवेशं तुमुलं चकार ॥ ४९ ॥ तमापतंतं नृपतेरवध्यो वन्यः करीति श्रुतवा
न्कुमारः ॥ निवर्तयिष्यन्विशिखेन कुंभे जघान नात्यायतकृष्टचापः ॥ ५० ॥ स विद्धमात्रः किल नागरू
पमुत्सृज्य तद्विस्मितसैन्यदृष्टः ॥ स्फुरत्प्रभामंडलमध्यवर्ती कांतं वपुर्व्योमचरं प्रपेदे ॥ ५१ ॥ अथ प्रभा
वोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः ॥ उवाच वाग्मी दशनप्रभाभिः संवर्द्धितोरस्थलता
रहारः ॥ ५२ ॥ मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं ॥ अवेहि गंधर्वपतेस्तनूजं श्रीव
२९

गतिं प्रपत्स्ये विहितो विधात्रा ४ इति शेषः न२

प्रियंवदं मां प्रियदर्शनस्य ॥ ५३ ॥ स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ॥ उष्ण
त्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ ५४ ॥ इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्य ५२
त्यजः कुंभमयोमुखेन ॥ संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्मां ॥ ५५ ॥ संमोचितः
सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ॥ प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्
धिः ॥ ५६ ॥ संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रं ॥ गांधर्वमादत्स्व यतः प्रयोक्तुर्न चा
रिहिंसा विजयश्च हस्ते ॥ ५७ ॥ अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोभूः प्रहरन्नपि त्वं ॥ तस्मादुपच्छं
दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं ॥ ५८ ॥ तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरि
तो नृसोमः ॥ उदङ्मुखः सोऽस्त्रविदस्त्रमंत्रं जग्राह तस्मान्निगृहीतशापात् ॥ ५९ ॥ एवं तयोरध्वनि दै
वयोगादासेदुषोः सख्यमचिंत्यहेतु ॥ एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ॥ ६० ॥
तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः ॥ प्रत्युज्जगाम क्रथकैशिकेंद्रश्चंद्रं प्रवृद्धोर्मिरिवो
र्मिमाली ॥ ६१ ॥ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ॥ मेने यथा तत्र जनः समे
तो वैदर्भमागंतुमजं गृहेशं ॥ ६२ ॥ तस्याधिकारिपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितहेम

कुम्भां रम्यां रघुप्रतिनिधिः स नवोपकार्यां बाल्यात्परामिव दशां मदनोऽध्युवास ॥६३॥ तत्र स्वयंवर
समाहृतराजलोकं कन्याललामकमनीयमजस्य लिप्सोः ॥ भावावबोधकलुषा दयितेव रात्रौ निद्रा
चिरेण नयनाभिमुखी बभूव ॥६४॥ तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृ
शाङ्गरागं । सूतात्मजाः सवयसः प्रथितप्रबोधं प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥६५॥ रात्रि
र्गता मतिमतां वर मुञ्च शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता । तामेकतस्तव बिभर्ति गुरुर्विनि
द्रस्तस्या भवानपरधुर्यपदावलम्बी ॥६६॥ निद्रावशेन भवताप्यनवेक्षमाणा पर्युत्सुकत्वमबला
निशि खण्डितेव । लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥६७॥
तद्वल्गुना युगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे । प्रस्पन्दमानपरुषेतरता
रमन्तश्चक्षुस्तव प्रचलितभ्रमरं च पद्मं ॥६८॥ वृन्ताच्छ्लथं हरति पुष्पमनोकहानां संसृज्य
ते सरसिजैररुणांशुभिन्नैः ॥ स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमा
रुतस्य ॥६९॥ ताम्रोदरेषु पतितं द्रुमपल्लवेषु निर्धौतहारगुलिकाविशदं हिमाम्भः ॥ आभाति ल
ब्धपरभागतयाधरोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयं ॥७०॥ यावत्प्रतापनिधिराक्रमते

न भानुरह्नाय तावदरुणेन तमो निरस्तं । आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः
स्वयमुच्छिनत्ति ॥७१॥ शय्यां जहत्युभयपक्षविनीतनिद्राः स्तम्बेरमा मुखरशृङ्खलकर्षिण
स्ते ॥ येषां विभान्ति तरुणारुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ॥७२॥ दीर्घेष्व
मी नियमिताः पटमण्डपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः ॥ वक्त्रोष्मणा मलिनयन्ति पुरो
गतानि लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥७३॥ भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ॥ अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शु
कस्ते मञ्जुवाक्पञ्जरस्थः ॥७४॥ इति विरचितवाग्भिर्बन्दिपुत्रैः कुमारः सपदि विगतनिद्रस्त
ल्पमुज्झांचकार ॥ मदपटु निनदद्भिर्बोधितो राजहंसैः सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥७५॥
अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमञ्चिताक्षिपक्ष्मा कुशलविरचितानुकूलवे
षः ॥ क्षितिपसमाजमगात्स्वयंवरस्थं ॥७६॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अज

रघुवंश
३०

स्वयंवराभिगमनो नाम पंचमः सर्गः ॥५॥ स तत्र मंचेषु मनोज्ञवेषान् सिंहासनस्थानुपचा
रवत्सु ॥ वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥१॥ रतेर्गृहीतानुनयेन का
मं प्रत्यर्पितस्वांगमिवेश्वरेण ॥ काकुत्स्थमालोकयतां नृपाणां मनो बभूवेंदुमतीनिराशं ॥२॥
वैदर्भनिर्दिष्टमथो कुमारः क्लृप्तेन सोपानपथेन मंचं ॥ शिलाविभंगैर्मृगराजशावस्तुंगं न
गोत्संगमिवारुरोह ॥३॥ परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः ॥ भूयिष्ठमासी
दुपमेयकांतिर्मयूरपृष्ठाश्रयिणा गुहेन ॥४॥ तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदु
र्निरीक्ष्यः ॥ सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ॥५॥ तेषां महार्हा
सनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ॥ रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पा
रिजातः ॥६॥ नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः ॥ मदोत्कटे रेचितपु
ष्पवृक्षा गंधद्विपे वन्य इव द्विरेफाः ॥७॥ अथ स्तुते वंदिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेव

रीव
३०

लोके ॥ संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयंतीः ॥८॥ पुरोपकंठोपवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ ॥ प्रध्मातशंखे परितो दिगंतांस्तूर्यस्वने मूर्छति मंगलार्थे ॥९॥ म
नुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि ॥ विवेश मंचांतरराजमार्गं पतिंवरा क्लृ
प्तविवाहवेषा ॥१०॥ त्रिभिर्विशेषकं ॥ तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ॥ निपे
तुरंतःकरणैर्नरेंद्रा देहैः स्थिताः केवलमासनेषु ॥११॥ तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां
प्रणयाग्रदूत्यः ॥ प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः ॥१२॥ कश्चित्कराभ्यामुप
गूढनालमालोलपत्राभिहतद्विरेफं ॥ रजोभिरंतःपरिवेषबंधि लीलारविंदं भ्रमयांचकार ॥१३॥
विस्रस्तमंसादपरो विलासी रत्नानुविद्धांगदकोटिलग्नं ॥ प्रालंबमुत्कृष्य यथावकाशं निना
य साचीकृतचारुवक्त्रः ॥१४॥ आकुंचिताग्रांगुलिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभः ॥
तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठं ॥१५॥ निवेश्य वामं भुजमासनार्धे तत्सं
निवेशादधिकोन्नतांसः ॥ कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ॥१६॥

विलासिनाविभ्रमदंतिपत्रमा पांडुरं केतकपत्रमन्यः॥ प्रियानितंबोचितसंनिवेशे विपारया
मासयुवानखाग्रेः॥१७॥ कुशेशयाताम्रतलेन काश्चित्करेण रेखाध्वजलांछनेन॥ रत्नां
गुलीयप्रभयानुविद्धानुदीरयामाससलीलमक्षान॥१८॥ कश्चिद्यथाभागमवस्थितेपि
स्वसंनिवेशाव्यतिलंघिनीव॥ वज्रांशुभिन्नांगुलिरंध्रमेकं व्यापारयामासकरं किरीटे॥१९॥
ततोनृपाणांश्रुतकीर्तिवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी॥ प्राक्संनिकर्षंमगधेश्वरस्यनीत्वा
कुमारीमवदत्सुनंदा॥२०॥ असौशरण्यःशरणोन्मुखानामगाधसत्वोमगधप्रतिष्ठः॥ राजा
प्रजारंजनलब्धवर्णः परंतपोनामयथार्थनामा॥२१॥ कामंनृपाःसंतिसहस्रशोन्ये राजन्व
तीमाहुरनेनभूमिं॥ नक्षत्रताराग्रहसंकुलापि ज्योतिष्मतीचंद्रमसैवरात्रीः॥२२॥ क्रि
याप्रबंधादयमध्वराणामजस्रमाहूतसहस्रनेत्रः॥ शच्याश्चिरंपांडुकपोललंबान्मंदार
शून्यानलकांश्चकार॥२३॥ अनेनचेदिच्छसिगृह्यमाणंपाणिंवरेण्येनकुरुप्रवेशे॥ प्र
सादवातायनसंस्थितानां नेत्रोत्सवंपुष्पपुरांगनानां॥२४॥ एवंतयोक्तेतमवेक्ष्यकिंचिद्विस्रं

सिदुर्वांकमधूकमाला॥ ऋजुप्रणामक्रिययैवतन्वी प्रत्यादिदेशैनमभाषमाणा॥२५॥ तांसैववे
त्रग्रहणेनियुक्ता राजांतरंराजसुतांनिनाय॥ समीरणोत्थेवतरंगलेखा पद्मांतरंमानसरा
जहंसी॥२६॥ जगादचैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः॥ विनीतनागःकिल
सूत्रकारैरैंद्रंपदंभूमिगतोपभुंक्ते॥२७॥ अनेनपर्यासयताश्रुविंदुमुक्ताफलस्थूलत
मांस्तनेषु॥ प्रत्यर्पिताःशत्रुविलासिनीनामाक्षिप्यसूत्रेणविनैवहाराः॥२८॥ निसर्गभिन्ना
स्पदमेकसंस्थमस्मिन्द्वयंश्रीश्चसरस्वतीच॥ कांत्यागिरासूनृतयाचयोग्या त्वमेवक
ल्याणितयोस्तृतीया॥२९॥ अथांगराजादवतार्यचक्षुर्याहीतिजन्यामवदत्कुमारी॥
नासौनकाम्योनचवेदसम्यग्द्रष्टुंनसाभिन्नरुचिर्हिलोकः॥३०॥ ततःपरंदुःप्रसहं
परसान्नृपंनियुक्ताप्रतिहारभूमौ॥ निदर्शयामासविशेषदृश्यमिंदुंनवोत्थानमिवें

विलासिनो विभ्रमदंतपत्रमापांडुरं केतकपत्रमन्यः॥ प्रियानितंबोचितसंनिवेशे र्विपाटया
मास युवा नखाग्रैः॥१७॥ कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलांछनेन॥ रत्नां
गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान॥१८॥ कश्चिद्यथाभागमवस्थितेपि
स्वसंनिवेशाद्व्यतिलंघिनीव॥ वज्रांशुगर्भांगुलिरंध्रमेकं व्यापारयामास करं किरीटे॥१९
ततो नृपाणां श्रुतवीर्यवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी॥ प्राक्संनिकर्षं मगधेश्वरस्य नीत्वा
कुमारीमवदत्सुनंदा॥२०॥ असौ शरण्यः शरणोन्मुखानामगाधसत्वो मगधप्रतिष्ठः॥ राजा
प्रजारंजनलब्धवर्णः परंतपो नाम यथार्थनामा॥२१॥ कामं नृपाः संतु सहस्रशोन्ये राजन्व
तीमाहुरनेन भूमिं॥ नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव रात्रिः॥२२॥ क्रि
याप्रबंधादयमध्वराणामजस्रमाहूतसहस्रनेत्रः॥ शच्याश्चिरं पांडुकपोललंबान्मंदार
शून्यानलकांश्चकार॥२३॥ अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे॥ प्र
सादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुरांगनानां॥२४॥ एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रं

सिदूर्वांकमधूकमाला॥ ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा॥२५॥ तां सैव वे
त्रग्रहणे नियुक्ता राजांतरं राजसुतां निनाय॥ समीरणोत्थेव तरंगलेखा पद्मांतरं मानसरा
जहंसी॥२६॥ जगाद चैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः॥ विनीतनागः किल
सूत्रकारैरैंद्रं पदं भूमिगतोपि भुंक्ते॥२७॥ अनेन पर्यासयताश्रुबिंदून्मुक्ताफलस्थूलत
मान्स्तनेषु॥ प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्य सूत्रेण विनैव हाराः॥२८॥ निसर्गभिन्ना
स्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च॥ कांत्या गिरा सूनृतया च योग्या त्वमेव क
ल्याणि तयोस्तृतीया॥२९॥ अथांगराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमारी॥
नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः॥३०॥ ततः परं दुःप्रसहं
परेषां नृपं नियुक्ता प्रतिहारभूमौ॥ निदर्शयामास विशेषदृश्यमिंदुं नवोत्थानमिवें

रघुवंश

३२

दुमत्यै॥३१॥अवंतिनाथोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः॥आरोप्यचक्रभ्र
ममुष्णतेजास्त्वष्ट्रेवयत्नोल्लिखितोविभाति॥३२॥तस्यप्रयाणेषुसमग्रशक्तेरग्रेसरैर्वा
जिभिरुत्थितानिकुर्वंतिसामंतशिखामणीनांप्रभाप्ररोहास्तमयंरजांसि॥३३॥असौम
चे४ हाकालनिकेतनस्यवसन्नदूरेकिलचंद्रमौलेः॥तमिस्रपक्षेसहप्रियाभिर्ज्योत्स्नावतो
निर्विशतिप्रदोषान्॥३४॥अनेनयूनासहपार्थिवेनरंभोरुकच्चिन्मनसोरुचिस्ते॥
सिप्रातरंगानिलकंपितासुविहर्तुमुद्यानपरंपरासु॥३५॥तस्मिन्नभिद्योतितबंधु
पद्मेप्रतापसंशोषितशत्रुपंके॥बबंधसानोत्तमसौकुमार्याकुमुद्वतीभानुमतीवभावं
॥३६॥तामग्रतस्तामरसांतराभामनूपराजस्यगुणैरनूनां॥विधायसृष्टिंललितांवि
धातुर्जगादभूयःसुदतींसुनंदा॥३७॥संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनि षीन

३२

खातयूपः॥अनन्यसाधारणराजश[…]दोबभूवयोगीकिलकार्तवीर्यः॥३८॥अकार्य
चिंतासमकालमेवप्रादुर्भवंश्चापधरःपुरस्तात्॥अंतःशरीरेष्वपियःप्रजानांप्रत्या
दिदेशाविनयंविनेता॥३९॥ज्याबंधनिष्पंदभुजेनयस्यविनिश्वसद्वक्त्रपरंपरेण॥
कारागृहेनिर्जितवासवेनलंकेश्वरेणोषितमाप्रसादात्॥४०॥तस्यान्वयेभूपतिरेषजा
तःप्रतीपइत्यागमवृद्धसेवी॥येनश्रियःसंश्रयदोषरूढंस्वभावलोलेत्ययशःप्रमृष्टं
॥४१॥आयोधनेकृष्णगतिंसहायमवाप्ययःक्षत्रियकालरात्रिं॥धारांशितांरामपरश्व
धस्यसंभावयत्युत्पलपत्रसारां॥४२॥अस्यांकलक्ष्मीर्भवदीर्घबाहोर्माहिष्मतीवप्रनि
तंबकांचीं॥प्रासादजालैर्जलवेणिरम्यांरेवांयदिप्रेक्षितुमस्तिकामः॥४३॥तस्याःप्रका
मंप्रियदर्शनोपिनसक्षितीशोरुचयेबभूव॥शरत्प्रमृष्टांबुधरोपरोधःशशीवपर्या
प्तकलोनलिन्याः॥४४॥साशूरसेनाधिपतिंसुषेणमुद्दिश्यलोकांतरगीतकीर्तिं॥

आचारशुद्धोभयवंशदीपं शुद्धांतरक्ष्या जगदे कुमारी ॥४५॥ नीपान्वयः पार्थिव एष
यज्वा गुणैर्यमाश्रित्य परस्परेण ॥ सिद्धाश्रमं शांतिमिवोग्रसत्वैर्निसर्गिकोप्युत्ससृजे
विरोधः ॥४६॥ यस्यात्मगेहे नयनाभिरामा कांतिर्हिमांशोरिव संनिविष्टा ॥ हर्म्याग्रसंरू
ढतृणांकुरेषु तेजोविषह्यं रिपुमंदिरेषु ॥४७॥ यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वा
रिविहारकाले ॥ कलिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति ॥४८॥ त्रातेन तार्क्ष्यात्किल
कालियेन मणिं विसृष्टं यमुनौकसा यः ॥ वक्षस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयती
व कृष्णं ॥४९॥ संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये ॥ वृंदावने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्री ॥५०॥ अध्यास्य चांभःपृषतोक्षितानि शैलेयगंधीनि
शिलातलानि ॥ कलापिनां प्रावृषि पश्य नृत्यं कांतासु गोवर्द्धनकंदरासु ॥५१॥

नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ॥ महीधरं मार्गवशादुपेतं स्रोतो
वहा सागरगामिनीव ॥५२॥ अथांगदाश्लिष्टभुजं भुजिष्या हेमांगदं नाम कलिंगनाथं ॥ आ
सेदुषीं सादितशत्रुपक्षं बालामबालेंदुमुखीं बभाषे ॥५३॥ असौ महेंद्राद्रिसमानसारः पतिर्मह
द्रस्य महोदधेश्च ॥ यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेंद्रः ॥५४॥ ज्याघातरेखे सुभु
जो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः ॥ रिपुश्रियः सांजनबाष्पसेके बंदीकृतानामिव प
द्धती ॥५५॥ यमात्मनः सद्मनि संनिकृष्टो मंद्रध्वनित्याजितयामतूर्यः ॥ प्रासादवातायन
दृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तं ॥५६॥ अनेन सार्द्धं विहरांबुराशेस्तीरेषु तालीव
नमर्मरेषु ॥ द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥५७॥ प्रलोभिताप्या
कृतिलोभनीया विदर्भराजावरजा तयैवं ॥ तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः
प्रतिकूलदैवात् ॥५८॥ अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसमानमेत्य ॥

रघुवंस
38

रुतश्च कोराक्षी विलोकयांति सर्वां क्षशीं हस्तं निजगाद भोज्यी ॥५९॥ पांड्यो पमंसार्पितलं
विहारः क्लृप्तांगरागो हरिचंदनेन ॥ आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रि
राजा ॥६०॥ विंध्यस्य संस्तंभयिता महाद्रे निःशेषपीतोज्झितसिंधुराज ॥ प्रीत्याश्वमेधाव
भृथार्द्रमूर्त्तेः सौस्नातिको यस्य भवत्यगस्त्य ॥६१॥ अस्त्रं हरादाप्तवता दुरापं येनेंद्रलोका
धिजयाय दृप्तः ॥ पुराजनस्यानविमर्द्दशंकी संधाय लंकाधिपतिः प्रतस्थे ॥६२॥
अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी ॥ रत्नानुविद्धार्णवमेखलाना
या दिशः सपत्नी भव दक्षिणस्याः ॥६३॥ तांबूलवल्लीपरिणद्धपूगास्वेलालतालिंगि
तचंदनासु ॥ तमालपत्रास्तरणासु रंतुं प्रसीद शश्वन्मलयस्थलीषु ॥६४॥ इंदी
वरश्यामतनुर्नृपोसौ त्वं रोचनागौरशरीरयष्टिः ॥ अन्योन्यशोभापरिवृद्धये वां योगस्तडितो
पदयोरिवास्तु ॥६५॥ स्वसुर्विदर्भाधिपतेस्तदीयो लेभेंतरं चेतसि नोपदेशः ॥ दिवाकराद शीव

38

र्शीनवकुद्मलोकोशोनक्षत्रनाथांशुरिवारविंदे ॥६६॥ संचारिणी दीपशिखेव रात्रौ यं यं व्यती
याय पतिंवरा सा ॥ नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥६७॥ तस्यां रघोः सू
नुरुपस्थितायां वृणीत मां नेति समाकुलो भूत ॥ वामेतरः संशयमस्य बाहुः केयूरबंधो
च्छ्वसितैर्विभेद ॥६८॥ तं प्राप्य सर्वावयवानवद्यं व्यावर्त्ततान्योपगमात्कुमारी ॥ न हि प्रफु
ल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली ॥६९॥ तस्मिन्समावेशितचित्तवृत्तिमिं
दुप्रभामिंदुमतीमवेक्ष्य ॥ प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनंदा ॥७०॥
इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोभूत ॥ काकुत्स्थशब्दं य
त उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशलेंद्राः ॥७१॥ महेंद्रमास्थाय महोक्षरूपं य
स्संयति प्राप्तपिनाकिलीलः ॥ चकार बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत

नुलेखा॥७२ ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन उपेयुषः स्वाम
पिमूर्त्तिमग्र्यामर्द्धासनं गोत्रभिदोधितस्थौ ७३॥जातःकुलेतस्यकिलोरुकीर्त्तिः कु
लप्रदीपोनृपतिर्दिलीपः अतिष्ठदेकोनशतक्रतुत्वेशक्राभ्यसूयाविनिवृत्तयेयः॥७४
यस्मिन्महींशासतिवारिणीनांनिद्रांविहारार्द्धपथेगतानां वातोपिनास्रंशयदंशु
कानिकोलंवयेदाभरणायहस्तं ७५ पुत्रोरघुस्तस्यपदंप्रशास्तिमहाक्रतोर्विश्वजि
तःप्रयोक्ताचतुर्दिगावर्ज्जनसंभृतांयोमृत्पात्रशेषामकरोद्विभूतिं ७६ आरूढमद्री
नुदधीन्वितीर्णंभुजंगमानांवसतिंप्रविष्टं ऊर्द्ध्वंगतंयस्यनचानुवंधियशःपरिछेत्तु
मियत्पतालं ७७ असौकुमारस्तमजोनुजातस्त्रिविष्टपस्येवपतिंजयंतः गुर्वींधुरं
योभुवनस्यपित्राधुर्येणदम्यःशदृशंविभर्त्ति ७८ कुलेनकांत्यानवसानवेन

गुणैश्चतैस्तैर्विनयप्रधानैः त्वमात्मनस्तुल्यममुंवृणीष्वरत्नंसमागछतुकांचनेन
७९ ततःसुनंदावचनावसानेलज्जांतनूकृत्यनरेंद्रकन्या दृष्ट्याप्रसादामलयाकुमा
रं प्रत्यग्रहीत्संवरणस्रजेव ८० सायूनितस्मिन्नभिलाषबंधंशशाकशालीनत
यानवक्तुं रोमांचलक्ष्येणसगात्रयष्टिंभित्वाविनिराक्रामदरालकेश्याः ८१ तथागता
यांपरिहासपूर्वंसख्यांसखीवेत्रधराबभाषे आर्येव्रजामोन्यतइत्यथैनांवधूरसू
याकुटिलंददर्श ८२ साचूर्णगौरंरघुनंदनस्यधात्रीकराभ्यांकरभोपमोरूः आ
संजयामासयथाप्रदेशंकंठेगुणंमूर्त्तमिवानुरागं ८३ तयास्रजामंगलपुष्पम
य्याविशालवक्षस्थललंवयासः अमंस्तकंठार्पितबाहुपाशांविदर्भराजावरजांव
रेण्यः ८४ शशिनमुपगतेयंकौमुदीमेघमुक्तंजलनिधिमनुरूपंजह्नुकन्याव

तीर्णी इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटुनृपाणामेकवाक्यं विवव्रुः ८५
प्रमुदितवरपक्षमेतानृक्षीतिपतिमंडलमन्यतो वितानं उषसि सर इव प्रफु
ल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ८६ इति श्रीरघुवंशे महाकाव्ये कवि
श्रीकालिदासकृतौ अजस्वयंवरो नाम षष्ठः सर्गः ६ अथोपयंत्रा सदृशेन युक्तां
स्कंदेन साक्षादिव देवसेनां स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमुखो बभूव
१ सेनानिवेशान्पृथिवीक्षितोपि जग्मुर्विभातग्रहमंदभासः भोज्यां प्रति व्यर्थमनोर
थत्वाद्रूपेषु वेषेषु च साभ्यसूयाः २ सान्निध्ययोगात्किल तत्र शच्याः स्वयंवरक्षोभकृतामभा
वः काकुत्स्थमुद्दिश्य समत्सरोपि शशाम तेनाक्षितिपाललोकः ३ तावत्प्रकीर्णाभिन
वोपचारमिंद्रायुधद्योततोरणांकं वीरः सवध्वा सह राजमार्गं प्राप ध्वजच्छा

यनिवारितातपं ४ ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु बभूवुरित्थं
पुरसुंदरीणां त्यक्तान्यकार्याणि विचेष्टितानि ५ आलोकमार्गं सहसा व्रजंत्या कया
चिदुद्वेष्टनवांतमाल्यः बंद्धुं न संभावित एव तावत्करेण रुद्धोपि हि केशपाशः ६
प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव उत्सृष्टलीलागतिरागवा
क्षादलक्तकांकां पदवीं ततान ७ विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामने
त्रा तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहंती ८ जालांतरप्रेषितदृ
ष्टिरन्या प्रस्थानभिन्नां न बबंध नीवीं नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलं
ब्य वासः ९ अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलंती कस्याश्चिदा
सीद्रशना तदानीमंगुष्ठमूलार्पितसूत्रशेषाः १० स्तनंधयं तं तनयं विहाय विलो

रघुवंस
३७

कनायत्वरया व्रजंती स प्रस्तुताभ्यां प्रदवी स्तनासीवेचकाचित्पयसा गवाक्षं ११
तासां मुखैरासवगंधगर्भै व्याप्तांतराः सांद्रकुतूहलानां विलोलनेत्रभ्रमरैर्ग
वाक्षाः सहस्रपत्राभरणा इवासां १२ तां राघवं दृष्टिभिरापिबंत्यो नार्यो न जग्मु
र्विषयांतराणि तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा १३ स्था
ने वृता भूपतिभिः परोक्षं स्वयंवरं साधुममंस्त भोज्या पद्मेव नारायणमन्यथासौ लभे
त कांतं कथमात्मतुल्यं १४ परस्परेणास्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत्
अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोभविष्यत् १५ रतिस्मरौ नूनमिमा
वभूतां राज्ञां सहस्रेषु तथैव बाला गतेहिमात्मप्रतिरूपमेव मनो हि जन्मांतरसंगति
ज्ञं १६ इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारं उद्भासितं मंगलसंविव

३७

द्भिः संबंधिनः सद्म समाससाद १७ ततो वतीर्याशु करेणुकायाः स कामरू
पेश्वरदत्तहस्तः वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमंतः १८ महार्हसिं
हासनसंस्थितो सौ सरत्नमर्घ्यं मधुपर्कमिश्रं भोजोपनीतं च दुकूलयुग्मं जग्राह सा
र्द्धं वनिताकटाक्षैः १९ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः वे
लासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्रपादैः २० तत्रार्चितो भोजपतेः पु
रोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः तमेव चाधाय विवाहसाक्ष्ये वधूवरं संग
मयांचकार २१ हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकासे अनंतरा
शोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन २२ आसीद्वरः कंटकितप्रकोष्ठः स्विन्नां
गुलीः संववृते कुमारी अस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन २३

रघुवंस तयोरुपांतप्रतिसारितानि क्रियासमापतिवृकातशाणि ह्रीयंत्रणामानशिरे मनोज्ञा
३९ मन्योन्यलोलानि विलोचनानि २४ प्रदक्षिणाप्रक्रमणात्कृशानोरुदर्चिषस्तन्मि
थुनं चकाशे मेरोरुपांतेष्विव वर्त्तमानमन्योन्यसंसक्तमहस्त्रियामं २५ नितंबगुरु
र्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन चकार सा मत्तचकोरनेत्रा लज्जा
वती लाजविसर्गमग्नौ २६ हविःशमीपल्लवलाजगंधी पुण्यः कृशानोरुदि
याय धूमः कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे २७ तदंजन
क्लेदसमाकुलाक्षं प्रम्लानवीजांकुरकर्णपूरं वधूमुखं पाटलगंडलेखमाचा
रधूमग्रहणाद्बभूव २८ तौ स्नातकैर्बंधुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयु
क्तं कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां २९ इतिस्वसु शिव
३८

रा
र्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा महीपतीनां पृथगर्हणार्थं समादिदेशा
धिकृतानधिश्रीः ३० लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः वैद
र्भमामंत्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाछलेन ३१ स राजलोकः कृतपूर्वसंविदारं
भसिद्धौ समयोपलभ्यं आदास्यमानः प्रमदामिषं तदावृत्य पंथानमजस्य तस्थौ ३२
भर्तापि तावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः सत्त्वानुरूपाहरणीकृतश्रीः
प्रस्थापयद्राघवमन्वगाच्च ३३ तिस्रस्त्रिलोकप्रथितेन सार्द्धमजेन मार्गे वसतीरुषि
त्वा तस्मादुपावर्त्तत कुंडिनेशः पर्वात्यये सोम इवोष्णरश्मेः ३४ प्रमन्यवः प्रागपि कोश
४२ लेंद्रे प्रत्येकमात्तस्वतया बभूवुः अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य
३५ तमुद्वहंतं पथि भोजकन्यां रुरोध राजन्यगणाः सदर्पाः बलिप्रदिष्टां श्रियमाददा

नत्रैविक्रमंपाद विवेदशत्रुः ३६ तस्याःसरक्षार्थमनल्पयोधमादिश्यपित्र्यंसचिवं
३८ कुमारः प्रत्यग्रहीत्पार्थिववाहिनींतांभागीरथींशोणइवोत्तरंगः ३७ पत्तिःपदातिं
रथिनंरथेशस्तुरंगसादीतुरगाधिरूढं यंतागजस्याभ्यपतद्गजस्थंतुल्यप्रतिद्वंद्वि ब
भूवयुद्धं ३८ नदत्सुतूर्येष्वविभाव्यवाचोनोदीरयंतिस्मकुलोपदेशान् बाणाक्षरै
र्वपरस्परस्यनामोर्जितंचापभृतःशशंसुः ३९ तल्लाटवक्त्रभृकुटीतरंगैस्तनुत्यजां
दंतनिपीडितोष्ठैः आतस्तटेभरत्निकृत्तकंठैः कारणभैरवनीशिरोभिः ४० उत्था
पितःसंयतिरे णुरश्वैःसांद्रीकृतःस्यंदनवंशचक्रैः विस्तारितकुंजरकर्णताल
नेत्रक्रमेणोपरुरोधसूर्यं ४१ मत्स्यध्वजावायुवशाद्विदीर्णैर्मुखैःप्रवृद्धध्वजिनी
रजांसिपावभूःपिबंतःपरमार्थमत्स्याःपाविलानीवनवोदकानि ४२ रथोरथां

गध्वनिनाविजज्ञेविलोलघंटाक्वणितेननागः स्वभर्तृनामग्रहणाद्बभूव सांद्रेरजस्यात्म
परावबोधः ४३ आवृण्वतोलोचनमार्गमाजौरजोंधकारस्यविजृंभितस्य शस्त्रक्ष
ताश्वद्विपवीरजन्माबालारुणोभूत्रुधिरप्रवाहः ४४ सच्छिन्नमूलःक्षतजेनरे
णुस्तस्योपरिष्टात्पवनावधूतः अंगारशेषस्यहुताशनस्यपूर्वोत्थितोधूमइवाव
भासे ४५ प्रहारमूर्छापगमेरथस्थाःयंतृनुपालभ्यविवस्वान् येःसादितालक्षित
पूर्वकेतुतानेवसामर्षतयानिजघ्नुः ४६ अप्यर्धमार्गेपरबाणलूनाधनुर्भृतांह
स्तवतांपृषत्काः संप्रापुरेवात्मजवानुवृत्त्यापूर्वार्धभागैःफलिभिःशरव्यं ४७ आ
धोरस्थानीगजसंनिपातेशिरांसिचक्रैर्निशितैःक्षुराग्रैः हृतान्यपिश्येननखा

रघुवंश

४०

ग्रकोटिव्यसक्तकेशानि चिरेणापेतुः ४८ पूर्वं प्रहर्त्ता निजघान भूयः प्रतिप्रहारा
क्षमम् अश्वसादी तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाचचक्षः ४९ तनुत्यजां
वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः उद्यंतमग्निं समयांबभूवुर्गजा विविग्नाः कर
सीकरेण ५० शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव रणक्षितिः शो
णितमद्यकुल्या रराज मृत्योरिव पानभूमिः ५१ उपांतयोर्निष्कुषितं विहंगैराक्षिप्य ते
भ्यः पिशितप्रियापि केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ५२
कश्चिद्द्विषत्खड्गहृतोत्तमांगः सद्यो विमानप्रभुतामुपेत्य वामांगसंसक्तसुरांग
नः स्वं नृत्यत्कबंधं समरे ददर्श ५३ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रांतवाय्वोः स
मकालमेव अमर्त्यभावेपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ५४ शिव

४०

अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् व्यश्वौ गदाव्यायतसंप्रहा
रौ भग्नायुधौ बाहुविमर्दनिष्ठौ ५५ व्यूहावुभौ तावितरेतरात्स्वं भंगं जयं चापतुरव्यव
स्थं पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ५६ परेण भग्नेपि बले
महौजा ययावजः प्रत्यरिसैन्यमेव धूमो निवर्त्येत समीरणेन यतो हि कक्षस्त
त एव वह्निः ५७ रथी निषंगी कवची धनुष्मान्दृप्तः स राजन्यकमेकवीरः विलोडयामास
महावराहः कल्पक्षयोद्वृत्तमिवार्णवांभः ५८ स दक्षिणं तूणमुखेन वामं व्यापारयन्ह
स्तमलक्ष्यताजौ आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान्
५९ स रोषदष्टाधरलोहितौष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः तस्तार गां भल्लनिकृत्त
कंठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ६० सर्वैर्बलांगैर्द्विरदप्रधानैः सर्वायुधैः कं

कटमेदिभिश्च सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ६१ सो
स्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः नीहारमग्नो दिनपूर्वभागः
किंचित्प्रकाशेन विवस्वतेन ६२ प्रियंवदात्प्राप्तमथाप्रियार्हः प्रायुंक्त राजस्वधिरा
जसूनुः गांधर्वमस्त्रं कुसुमास्त्रकांतः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ६३ ततो
धनुकर्षणमूढहस्तमेकांसपर्यस्तसमस्त्रजालं तस्थौ ध्वजस्तंभनिषण्णदेहं
निद्राविधेयं नरदेवसैन्यं ६४ ततः प्रियोपात्तरसेधरोष्ठे निवेश्य दध्मौ जलजं
कुमारः तेन स्वहस्तार्जितमेकवीरः पीवन्यशो मूर्तमिवाबभासे ६५ शंखस्वना
भिज्ञतया निवृत्तास्तं छन्नशत्रुं ददृशुः स्वयोधाः निमीलितानामिव पंकजानां म
ध्येस्फुरंतं प्रतिमाशशांकः ६६ सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु शीव

पार्थिवानां यशोहृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ६७ स चाप
कोटीनिहितैकबाहुः शिरस्त्राणनिष्कर्षणभिन्नमौलिः ललाटबद्धश्रमवारि
बिंदुर्भीतां प्रियामेत्य वचो बभाषे ६८ इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्या
नुमता मयासि एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ६९ त
स्याः प्रतिद्वंद्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे निश्वासबाष्पापगमात्प्रपन्नः
प्रसादमात्मीयमिवात्मदर्शः ७० हृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रि
यमभ्यनंदत् स्थलीनवांभःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृंदं ७१ इति शि
रसि वामं पादमाधाय राज्ञामुदवहदनवद्यां तामवद्यादपेतः रथतुरगरजोभि
स्तस्य रूक्षालकाग्रा समरविजयलक्ष्मीः सैव मूर्ता बभूव ७२ प्रथमपरिगतार्थस्तं रघुः

संनिरस्ते विजायिनमभिनंद्य श्लाघ्यंजाया समेते तदुपहितकुटुंबः शांतिमार्गोत्सुकोभू
न्नहिसतिकुलधुर्येसूर्यवंश्यागृहाय ७१ इतिश्री रघुवंशे महाकाव्ये कविश्रीकालि
दासकृतौ अजविवाहोनाम सप्तमः सर्ग ७ अथतस्य विवाहकौतुकं ललितं बिभ्रत
एवपार्थिवः वसुधामपिहस्तगामिनी मकरोदिंदुमतीमिवापरां १॥ दुरितैरपिकर्तुमा
त्मसात्प्रयततेनृपसुतेनदोहियत् तदुपस्थितमग्रहीदजः पितुराज्ञेतिनभोगतृष्णया
२ अनुभूयवशिष्टसंभृतैः सलिलैस्तेनमहाभिषेचनं विसदोच्छ्वसितेनमेदिनी
कथयामासकृतार्थतामिव ३ सबभूवदुरासदः परैर्गुरुणाथर्ववीदाकृतक्रियः
पवनाग्निसमागमोह्ययंसहितंब्रह्मयदस्त्रतेजसा ४ रघुमेवनिवृत्तयौवनंतम
मन्यतनरेश्वरंप्रजाः सहितस्यनकेवलांश्रियंप्रतिपेदेसकलान्गुणानपि ५
अधिकंशुशुभेशुभंयुना द्वितयेनद्वयमेवसंगतं पदमृद्धमजेनपैतृकं विनये

नास्यनवंचयौवनं ६ सदयंबुभुजेमहाभुजः सहसोद्वेगमियंव्रजेदिति अचिरो
पनतांसमेदिनींनवपाणिगृहीतीं वधूमिव ७ अहमेवमतोस्यभूपतेरिति
सर्वः प्रकृतिष्वचिंतयत् ६ उदधेरिवनिम्नगाशतेष्वभवन्नास्यविमाननाक्वचि
त् ८ नखरोचनमृदुर्बभूवसामृदुः पवमानः पृथिवीरुहानिव सपुरस्कृतमध्यम
क्रमोनमयामासनृपाननुद्धरन् ९ अथवीक्ष्यरघुःप्रतिष्ठितंप्रकृतिष्वा
त्मजमात्मवत्तया विषयेषुविनाशधर्मसुत्रिदिवस्थेष्वपिनिस्पृहोभवत्
१० गुणवत्सुतरोपितश्रियः परिणामेहिदिलीपवंशजाः पदवींतरुवल्कवाससां
प्रयताःसंयमिनांप्रपेदिरे ११ तमरण्यसमाश्रयोन्मुखं शिरसावेष्टनशोभिनासुतः
पितरंप्रणिपत्यपादयोरपरित्यागमयाचतात्मनः १२ रघुरश्रुमुखस्यतस्यतत्कृतवानी

रघुवंश
५३

सितमात्मजाप्रियः नतु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियं १३ स वहिः क्षितिपाल
वेश्मनो निवसन्नावसथे यति प्रियः समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रि
याः १४ प्रथमस्थिति पूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरं नभसा निभृतेन्दुना तुलामु
दितार्केण समारुरोह तत् १५ यतिपार्थिवलिंगधारिणौ ददृशाते रघुराघ
वौ जनैः अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ १६ क्षपकः समपृच्य
त नृपतिर्युवा सचिवैः प्रत्यहमर्थसिद्धये अपुनर्जननोपपत्तये प्रवयाः संयमि
भिर्मनीषिभिः १७ अजिताधिगमाय मंत्रिभिर्युयुजे नीतिविशारदैरजः अन
पायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः १८ अनुरंजयितुं प्रजाः
प्रभुर्व्यवहारासनमाददे युवा अपरः शुचिविष्टराश्रयः परिवेतुं यततेस्म धारि शे
५३

णां १९ अनयत्प्रभुशक्तिसंपदा वशमेको नृपतीननेतरान अपरः प्रणिधाने
योग्यया मरुतः पंचशरीरगोचरान २० नयचक्षुरजो दिदृक्षया पररंध्रस्य ततान
मंडले हृदये समरोपयन्मनः परमं ज्योतिरवाक्षितुं रघुः २१ अकरोदचिरेश्व
राक्षितो द्विषदारंभफलानि भस्मसात् अपरो दहने स्वकर्मणां ववृते ज्ञानम
येन वह्निना २२ पणबंधमुखान्गुणानजः षडुपायुंक्त समीक्ष्य तत्फलं रघुर
पि जयं गुणत्रये प्रकृतिस्थं समलोष्टकांचनः २३ न नवः प्रभुराफलोदयास्थि
रकर्मा विरराम कर्मणः नच योगविधेर्नवेतरः स्थिरधीरापरमार्थदर्शना
त् २४ इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ प्रसितावुदयापवर्ग
योरुभयीं सिद्धिमुभाववापतुः २५ अथ काश्चिदजव्यपेक्षया गमयित्वा

रघुवंश ५५

समदर्शिनः सनाः तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः २६ श्रु
तदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः विदधे वि[illegible]धिमस्य नैष्ठि
कं यतिभिः सार्द्धमनग्निमग्निचित् २७ अकरोत्स तदौर्ध्वदैहिकं पितृभ[illegible]
क्त्यापितृकार्यकल्पवित् नहि तेन पथा तनुत्यजस्तनयावर्जितपिंडकां
क्षिणः २८ सपरा[illegible]ङ्गतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः शमिता
धिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् २९ क्षितिरिंदुमती च भा
मिनी पतिमासाद्य तमग्र्यपौरुषं प्रथमा मदधिरत्नसूरभूदपरा वीरमजी
जनत्सुतं ३० दशरश्मि[illegible]शतोपम[illegible]तिं यशसा दिक्षु दशस्वपि श्रुतं शीं

५५

दशपूर्वरथं यमाख्यया दशकंठारिगुरुं विदुर्बुधाः ३१ ऋषिदेवगणस्वधा
भुजां श्रुतयागप्रसवैः स पार्थिवः अनृणत्वमुपेयिवान्बभौ परिधेर्मुक्त इवोष्ण
दीधितिः ३२ बलमार्तभयोपशांतये विदुषां सन्नतये बहुश्रुतं वसु तस्य न केवलं
विभोर्गुणवत्तापि परप्रयोजनं ३३ सकदाचिदवेक्षितोदधेः श्रितगोकर्णनिकेतमीश्व
रं उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः ३५ कुसुमैर्ग्रथितामपार्थिवैः
स्रजमातोद्यशिरोनिवेशितां अहरत्किल तस्य वेगवानधिवाससृहयेव मारुतः ३६
भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः ददृशे पवनावलेपजं सृज
ती वाष्पमिवांजनाविलं ३७ अभिभूय विभूतिमार्तवीं मधुगंधातिशयेन वीरु
धां नृपतेरमरस्रगाप सा दयितोरस्थलकोटि[illegible]स्थीति ३८ क्षणमात्रस

रघुवंस ४५ खीसुजातयोःस्तनयोस्तामवलोक्यविह्वलानिमिमीलनरोत्तमप्रियाहृतचंद्रा
तमसेवकौमुदी ३९ सममेवनराधिपेनसागुरुसम्मोहविलुप्तचेतसा अगम
त्सहतैलविंदुनानवदीपार्च्छिवाक्षितेस्तलं ४० वपुषाकरणोज्झितेनसानिप
तंतीमप्यपातयत् ननुतैलनिषेकविंदुनासहदीपार्चिरुपैतिमेदिनी ४१ उभ
योःपरिपार्श्ववर्तिनां तुमुलेनार्तरवेजिताः विहंगाकमलाकराश्रयाः समदुः
खाइवतत्रचुक्रुशुः ४२ नृपतेर्व्यजनादिभिस्तमोनुदेसानुतथैवसंस्थिता प्र
तिकारविधानमायुषःसतिशेषेहिफलायकल्प्य ४३ प्रतियोजयितव्यवल्लकी
समवस्थामथसत्वविप्लवात् सनिनायनितांतवत्सलपरिगृह्योचितमंकमंग
नां ४४ पतिरंकनिषण्णयातयाकरणापायविभिन्नवर्णया समलक्ष्य श्रीवं ४५

तविभ्रदाविलांमृगलेखामुखसीवचंद्रमाः ४५ विललापसबाष्पगद्गदंसहजा
मप्यपहायधीरतां अभितप्तमयोपिमार्दवंभजतेकैवकथाशरीरिषु ४६ कुसु
मान्यपिगात्रसंगमात्प्रभवंत्यायुरपोहितुंयदि नभविष्यतिहंतसाधनंकि
मिवान्यत्प्रहरिष्यतोविधेः ४७ अथवामृदुवस्तुहिंसितुंमृदुनेवारभतेप्रजां
तकः हिमसेकविपत्तिरत्रमेनलिनीपूर्वनिदर्शनंगता ४८ अथवामम
भाग्यविप्लवाशनिकल्पितएषवेधसा यदनेनतरुर्नपातितःक्षपितातद्विट
पाश्रितालता ४९ स्रगियंयदिजीवितापहाहृदयेकिंनिहितानहंतिमा
विषमप्यमृतंक्वचिद्भवेदमृतंवाविषमीश्वरेछया ५० कृतवत्यसिनावधी
रणामपराद्धेपियदाचिरंमयिकथमेकपदेनिरागसंजनमाभाष्यमिमं

न मन्यसे ५१ ध्रुवमस्मि शठः शुचिस्मिते विदितः कैतववत्सलस्तव परलोकमसं
निवृत्तये यदनामन्त्र्य गतासि मामितः ५२ दयितां यदि तावदन्वगाद्विनिवृत्तं कि
मिदं तया विना सहतां हतजीवितं मम प्रबलामात्मकृतां नु वेदनां ५३ सुरतश्रम
वारिबिंदवो न तु तावद्विरमंति ते मुखे स्वयमस्तमितास्य हो बत क्षरि(रि)रां देहभृ
तामसारतां ५४ सुरतश्रमसंभृता मुखे ध्रियते स्वेदलवोद्गमोपि ते स्वयमस्तमि
तास्त्वमात्मना धिगिमां देहभृतामसारतां ५५ मनसापि न विप्रियं मया कृतपूर्वं
तव किं जहासि मां ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबंधना रतिः ५६ कुसु
मोत्खचितान्वलीभृतश्चलयन्भृंगरुचस्तवालकान् करभोरु करोति मारु
तस्त्वदुपावर्तनशंकि मे मनः ५७ इदमुच्छ्वसितालकं मुखं तव विश्रांतक

थं दुनोति मां निशि सुप्तमिवैकपंकजं विरताभ्यंतरषट्पदस्वनं ५८ तदपो
हितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे ज्वलितेन गुहागतं तमस्तुहिना
द्रेरिव नक्तमोषधिः ५९ शशिनं पुनरेति शर्वरी दयिता द्वंद्वचरं पतत्रिणं इ
ति तौ विरहांतरक्षमौ कथमत्यंतगता न मां दहेः ६० नवपल्लवसंस्तरेपि
ते मृदु दूयेत यदंगमर्पितं तदिदं विषहिष्यते कथं वद वामोरु चिताधिरो
हणं ६१ इयमप्रतिबोधशायिनी रसना त्वां प्रथमा रहःसखी गतिविभ्रमसा
दनीरवा न शुचा नानुमृतेव लक्ष्यते ६२ कलमन्यभृतासु भाषितं कलहंसीषु म
दालसं हरिणीषु विलोलमीक्षितं पवनोद्धूतलतासु विभ्रमाः ६३

त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया विरहे तव मे गुरुव्यथं
हृदयं न त्ववलम्बितुं क्षमाः ६४ मिथुनं परिकल्पितं त्वया सहकारः फलिनी च
नन्विमौ अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतं ६५ कुसुमं कृ
तदोहदस्त्वया यदशोकोयमुदीरयिष्यति अलकाभरणं कथं नु तत्तव नेष्यामि
निवापमाल्यतां ६६ स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभं अमुना
कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ६७ तव निश्वसितानुकारिभि
र्वकुलैरर्द्धचितां समं मया असमाप्य विलासमेखलां किमिदं किंनरकण्ठि सुप्य
से ६८ समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः अहमेकर
सस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ६९ धृतिरस्तमिता रतिश्च्युता वि

रतं गेयमृतुर्निरुत्सवैः गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ७० गृ
हिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतं ७१ मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे अ
नुपास्यसि वाष्पदूषितं परलोकोपनतं जलाञ्जलिं ७२ विभवेपि सति त्वया विना सुखमे
तावदजस्य गण्यतां अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ७३ विलप
न्निति कोशलाधिपः करुणार्थग्रथितं प्रियां प्रति अकरोत्पृथिवीरुहानपि स्रुतशा
खारसवाष्पदूषितान् ७४ अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीं विस
सर्ज तदन्त्यमण्डनामनलायागुरुचन्दनैधसे ७५ प्रमदामनु संस्थितः शुचा नृपतिः
सन्निति वाच्यदर्शनात् न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया ७६

अथ दिव्य दिवं पूतां प्रियां धनिना तेन दशाहतः परे विदुषा विधयः समापिता सुर एवोपवने महर्द्धयः ७६ स विवेश पुरीं तया विना क्षणदापायशशांकदर्शनः परिवाहमिवावलोकयः स्वशुचः पौरवधूमुखाश्रुषु ७८ अथ तं सवनीयादीक्षितः प्रणिधानाद्गुरुराश्रमाश्रितः अभिषंगजडं विजिज्ञिवानिति शिष्येण किलान्वबोधयत ७९ असमाप्तविधिस्तपोनिधिस्तव विद्वानपि तापकारणं न भवंतमुपस्थितः स्वयं प्रकृतौ स्थापयितुं कृतस्थितिः ॥८०॥ मयि तस्य सुवृत्त वर्तते लघुसंदेशपदा सरस्वती शृणु विश्रुतसत्वसार तां हृदि चैनामुपधातुमर्हसि ८१ पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च स हि निःप्रतिघेन चक्षुषा त्रितयं ज्ञानम

येन पश्यति ८२ चरतः किल दुश्चरं तपस्तृणविंदोः परिशंकितः पुरा प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुरांगना ८३ स तपःप्रतिबंधमन्युना प्रमुखाविष्कृतचारुविभ्रमां अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा मुनिः ८४ भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे इति चोपनतां क्षितिस्पृशं कृतवाना सुरपुष्पदर्शनाशा ८५ क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणं ८६ तदलं तदपायचिंतया विपदुत्पत्तिमतामुपस्थिता वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ८७ उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्त्वया मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यतां ८८ रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते

परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनां ८५ अपशोकमनाः कुटुंबिनीम
नुगृह्णीष्व निवापदत्तिभिः स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ८६ म
रणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः क्षणमप्यवतिष्ठते श्वसन्य
दि जंतुर्ननु लाभवानसौ ८७ अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितं
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतं ८८ स्वशरीरशरीरिणावपि
स्मृतसंयोगविपर्ययौ यदा विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितं ८९ न
पृथग्जनवच्छुचो वशं वशिनामुत्तम गंतुमर्हसि द्रुमसानुमतां किमंतरं यदि वायौ द्वित
येपि ते चलाः ९० स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिं तदलब्ध
पदं हृदि शोकघने प्रतियातमिवांतिकमस्य गुरोः ९१ तेनाष्टौ परिगमिताः समाः कथं
चिद्बालत्वादवितथसूनृतेन सूनोः सा हस्य प्रतिकृतिविदर्शनैः प्रियायाः स्वप्नेषु क्षणि

कसमागमोत्सवैश्च ९२ तस्य प्रसह्य हृदयं किल शोकशंकुः प्लक्षप्ररोह इव सौधत
लं बिभेद प्राणांतहेतुमपि तं भिषजामसाध्यं लाभं प्रियानुगमने त्वरया स मेने ९३ सम्यग्वि
नीतमथ वर्महरं कुमारमादिश्य रक्षणविधौ विधिवत्प्रजानां रोगोपसृष्टतनुदुर्वस
तिं मुमुक्षुः प्रायोपवेशनमतिर्नृपतिर्बभूव ९४ तीर्थे तोयव्यतिकरभवे जन्हुकन्यासरय्वो
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः पूर्वाकाराधिकचतुरया संगतः कांत
यासौ लीलागारेष्वरमत पुनर्नंदनाभ्यंतरेषु ॥९५॥ इति श्रीरघुवंशे महाकाव्ये का
लिदासकृतौ अजविलापो नामाष्टमः सर्गः ॥८॥ पितुरनंतरमुत्तरकोशलान्समधिग
म्य समाधिजितेंद्रियः दशरथः प्रशशास महारथो यमवतामवतां च धुरि स्थितः १ अधि
गतं विधिवद्यदपालयत्प्रकृतिमंडलमात्मकुलोचितं अभवदस्य ततो गुणवत्तरं सनग
रं नगरंध्रकरौजसः २ उभयमेव वदंति मनीषिणः समयवर्षितया कृतकर्मणां

५० वलनिसूदनमर्थपतिं च तं श्रमनुदं मनुदंडधरान्वयं ३ जनपदे न गदः पदमादधावभिभ
वः कुत एव सपत्नजः क्षितिरभूत्फलवत्यजनंदने शमरते मरतेजसि पार्थिवे ४ दश
दिगंतजिता रघुणा यथा श्रियमपुष्यदजेन ततः परं तमधिगम्य तथैव पुनर्बभौ न नम
हीनपराक्रमं ५ समतया वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः अनुययौ य
मपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ६ न मृगयाभिरतिर्न दुरोदरं नवशशिप्र
तिमाभरणं मधु तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत् ७ न कृपणा
प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि न च सपत्नजनेष्वपि तेन वागपरुषा
परुषाक्षरमीरिता ८ उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः स
हि निदेशमलंघयतामभूत्सुहृदयो हृदयः प्रतिगर्जतां ९ अजयदेकरथेन स मेदि
नीमुदधिनेमिमधिज्यशरासनः जयमघोषयदस्य हि केवलं गजवती जवती तीव ५०

व्रहया चमूः १० जघननिर्विषयीकृतमेखलाननुचिताश्रुविलुप्तविशेषकान् स रिपुदा
रगणानकरोद्बलादनलकानलकाधिपविक्रमः ११ अवनिमेकरथेन वरूथिना जित
वतः किल तस्य धनुर्भृतः विजयदुंदुभितां ययुरर्णवा घनरवा नरवाहनसंपदः १२ स्फु
रितकोटिसहस्रमरीचिना समचिनोत्कुलिशेन हरिर्यशः स धनुषा युधि सायकव
र्षिणा स्वनवतानवतामरसाननः १३ शमितपक्षबलः शतकोटिना शिखरिणां कुलि
शेन पुरंदरः स शरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः १४ चरणयोर्नख
रागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् नृपतयः शतशो मरुतो यथा शतमखंदि
तपोरुषं १५ निववृते स महार्णवरोधसः सचिवकारितबालसुतांजलीन् समनुकं
प्य सपत्नपरिग्रहाननलकानवमां पुरी १६ उपगतोपि च मंडलनाभितामनुदिता
न्यसितातपवारणः [redacted] यमवेक्ष्य स रंध्रचलामभूदन

लासोऽनलसोऽमसमप्रकृतिः १७ तमलभंत पतिं पतिदेवताः शिखरिणामिव सागर
मापगाः मगधकोशलकेकयशासिनां दुहितरोऽहितरोपितमार्गणे १८ प्रियतमा
भिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः उपगतो विनिनीषुरिव प्रजा हरि
हयोऽरिहयोगविचक्षणः १९ क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसु
ना कृताः कनकयूपसमुच्छ्रयशोभिनो वितमसा सरयूतटाः २० अजिनदंडभृ
तं कुशमेखलां यतगिरं मृगशृंगपरिग्रहां अधिवसंस्तनुमध्वरदीक्षितामसम
भामसमभासयदीश्वरः २१ अवभृथप्रयतो विजितेंद्रियः सुरसमाजसमाक्रमणोचि
तः नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः २२ तमपहाय ककु
त्स्थकुलोद्भवं पुरुषमात्मभवं च पतिव्रता नृपतिमन्यमसेवत देवता सकमला कमला
घवमर्थिषु २३ स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः

स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः २४ असकृदेकरथेन तरस्विना
हरिहयाग्रसरेण धनुर्भृता दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुर
द्विषां २५ अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपं यमकुबेरजले वे ३
श्वरवज्रिणां समधुरं मधुरंचितविक्रमे २६ जिगमिषुर्धनदाध्युषितां दिशं
रथयुजा परिवर्तितवाहनः दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नग
मत्यजत् २७ हिमविवर्णितचंदनपल्लवं विरहयन्मलयाद्रिमुदङ्मुखः विहग
योः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः २८ कुसुमजन्म ततो नवपल्लवा
स्तदनु षट्पदकोकिलकूजितं इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवती
र्य वनस्थली २९ व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलं

रघुवंस
५२

नखलुतावदशेषमपोहितुं रविरलंविरलंकृतवानहिमं॥३० परभृतामदनक्षतचेत
सः प्रियसखीलघुवागिवयोषितांप्रियतमानकरोत्कलहांतरेम्हदुरवादुरवाप
समागमात् ३१ अभिनयान्परिचेतुमिवोद्यतामलयमारुतकंपितपल्लवा अम
दयत्सहकारलतामनः सकलिकाकलिकामजितामपि ३१ नयगुणोपचित
मिवभूपतेः सदुपकारफलांश्रियमर्थिनः अभिययुःसरसोमधुसंभृतांकमलि
नीमलिनीरपतत्रिणः ३२ कुसुममेवनकेवलमार्तवंनवमशोकतरोःस्मरदीप
नं किसलयप्रसवोपिविलासिनांमदयितादयिताश्रवणार्पितः ३४ विरचिता
मधुनोपवनश्रियामभिनवाइवपत्रविशेषकाः मधुलिहांमधुदानविशारदाः
कुरवकारवकारणतांययुः ३५ दशनचंद्रिकयाव्यवभासितंहसितमासव
गंधिमधोरिवतिलककपुष्पमसेव्यतषट्पदैः अभिविरसंविरसंचितामिपङ्क्तिभिः ३६
उपहितंशिशिरोपगमश्रियामुकुलजालमशोभतकिंशुके प्रणयिनीवनखक्षतमं
डनंप्रमदयामदयापितलज्जया ३७ सुरभिसंगमजंवनमालयानवपलाशमधा
र्यतभंगुरं रमणादत्तमिवाद्रनखक्षतंप्रमदयामदयापितलज्जया ३८ स्ववदनाव
दनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः मधुकरैरकरोन्मधुलोलुपैर्बकु
लमाकुलमायतपंक्तिभिः ३९ ध्वजपटंमदनस्यधनुर्भृतःअधिकरंमुखचूर्णम
तुश्रियः कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ४० प्रथम
मन्यभृताभिरुदीरिताः प्रविरलाइवमुग्धवधूकथाः सुरभिगंधिषुशुश्रुवि
रेगिरः कुसुमितासुमितावनराजिषु ४१ तिलकमस्तकहर्म्यकृतास्पदैः कु

धु
शिव
५२

सुमनधनुर्धंगसुगंधिभिः कलमगीयत भृंगविलासिभिः स्मरयुतेरयुतेरखद्या स
खेः ४२ श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदंतरुचोबभुः उपवनांतल
ताः पवनाहतैः किसलयैः सलयैरिवपाणिभिः ४३ ललि तविभ्रमबंधविचक्षणं
सुरभिगंधपराजितकेशरं पतिषुनिर्विविशुर्मधुमंगनाः स्मरसखंरसखंडनव
र्जितं ४४ शुशुभिरे स्मितचारुतराननाः स्त्रियइवश्लथसंजितमेखलाः विकचिता
मरसा गृहदीर्घिका मदकलोदकलोलविहंगमाः ४५ गमयितुं प्रभुरेषसुखेनमां न
महतीवतयाथवधूजनः इतिदयातइवाभवदायता नरजनीरजनीशवतीमधौ
४६ उपपायीतनुतां मधुखंडिता हिमकरोदयपांडुमुखछविः सदृशमिष्टसमागम
नितयानितयारजनीवधूः ४७ त्यजतमानमलंवतविग्रहैर्नपुनरेतिगतंचतु

रवयः परभृताभिरितीवनिवेदिते स्मरमतेरमतेस्मवधूजनः ४८ लवयतिस्मनप
त्पपराधजं नसहकारतरुस्तरुणी भृतां कुसुमितोनमितोऽलिभिरुन्मदैः स्मरसमा
धिकरोधिकरोषितां ४९ अनलसान्यभृतानलमात्मनः कमलवधूविभ्रमवाम
रुतेरिती कुसुमभारनताध्वगयोषितामशमशोकमशोकलताकरोत् ५० अपतुष
वारतया विशदप्रभैः सुरतरागपरिश्रमनोदिभिः कुसुमचापमतेजयदंशुभिर्हिम
करोमकरोर्जितकेतनं ५१ हुतहुताशनदीप्तिवनश्रियः प्रतिनिधिः कनकाभ
रणास्ययत युवतयः कुसुमेदधुराहितं ततदलेकेदलके सरपेशले ५२ अलिभि
रंजनबिंदुमनोहरैः कुसुमपंक्तिनिपातिभिरंकितः नखलुशोभयतिस्मवनस्थ
लीनतिलकस्तिलकः प्रमदामिव ५३ अमदयन्मधुगंधसनाथया किसलया
धरसंगतयामनः कुसुमसंभृतयानवमल्लिकास्मितरुचा तरुचारुविलासि

नां ५४ अरुणरागनिषेधिभिरंशुकैः श्रवणचपदैश्च यवांकुरैः परभृताविरुतै
श्च विलासिनः स्मरबलैरबलैकरसाः कृताः ५५ उपचितावयवाशुचिभिः कणैर
लिकदंबकयोगमुपेयुषी सदृशकांतिरलक्ष्यत मंजरी तिलकजालकजालकमौ
क्तिकैः ५६ अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकंठजिघृक्षया अनप
दासनरज्जुपरिग्रहे भुजलतां जडतामबलाजनः ५७ विशदचंद्रकरं सुखमारुतं
कुसुमितद्रुममुन्मदकोकिलं तदुपभोगरसं हिमवर्जिताः परमृतोरमृतोपम
तोयपी ५८ अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसख नरपतिश्चक
मे मृगयारतिं समधुमन्मथसंनिभः ५९ परिचयं चललक्ष्यनिपातने भयरुषो टीव
श्च तदिंगितबोधनं श्रमजयात्प्रगुणांच करोत्यसौ तनुमतोनुमतः सचिवैर्य

यौ ६० मृगवनोपगमाक्षमवेषभृद्विपुलकंठनिषक्तशरासनः गगनमश्वखुरो
द्धतरेणुभिर्नृसवितानमिवाकरोत् ६१ ग्रथितमौलिरसौ वनमालया
यानवपल्लवसवर्णतनुच्छदः तुरगवल्गनचंचलकुंडलो विरुरुचेष्टितभूमिषु
६२ तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः ददृशुरध्वनि तं
वनदेवताः सुनयनं नयनंदितकोशलं ६३ श्वगणिवागुरिकैः प्रथमास
स्थितं व्यपगतानलदस्युविवेश सः स्थिरतुरंगमभूमि निपानवन्मृगवयोगवयोप
चितं वनं ६४ अथ नभस्य इव त्रिदशायुधं कनकपिंगतडिद्गुणसंयुतं धनुर
धिज्यमनाधिरुपाददे नरखरोषितकेसरा ६५ तस्य स्तनप्रणयिभिर्मुहुरे
णशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् आविर्बभूव कुशगर्भमुखं मृगाणां यू
थं तदग्रसरगर्वितकृष्णसारं ६६ तत्प्रार्थितं जवनवाजिगतेन राज्ञा तूणीमुखो

रघु०
५४
हृतशरस्राविशीर्णपंक्ति श्यामीचकार वनमाकुलदृष्टिपातैर्वातेरितोत्पलप्रकरैरिवान्तः दा
५७ लक्षीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्यास्थितां सहचरीं व्यवधाय देहं आकर्णकृ
ष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार ५८ तस्यापरेष्वपि मृगे
षु शरान्मुमुक्षोः कर्णान्तमेत्य बिभिदे निबिडोपि मुष्टिः त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः प्रौ
ढप्रियानयनविभ्रमचेष्टितानि ५९ उत्तस्थुषः शिशिरपल्वलपंकमध्यान्मुस्ताप्र
रोहकवलावयवानुकीर्णं जग्राह स द्रुतवराहकुलस्य मार्गं सुव्यक्तमार्द्रपदपं
६० क्तिभिरायताभिः तं वाहनादवनतोत्तरकायमीषद्विध्यन्तमुद्धृतसटाः प्रतिहन्तुमीषुः
नात्मानमस्य सहसा विविदुर्वराहा वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु ६१ तेनाभिघात
रभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः निर्भिद्य विग्रहमशोणितलि
प्तपुंखस्तं पातयां प्रथममास पपात पश्चात् ६२ प्रायो विषाणपरिमोक्षलघू श्रीव
५५

त्तमांगान् खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः शृंगं स दृप्तविनयाधिकृतः परे
षामत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ६३ व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः
फुल्लासनाग्रविटपानिव वायुरुग्णान् शिक्षाविशेषलघुहस्ततया निमेषात्तूणी
चकार शरपूरितवक्त्ररंध्रान् ६४ निर्घोषितैः कुंजलीनान्जिघांसुर्ज्यानि
र्घोषैः क्षोभयामास सिंहान् नूनं तेषामभ्यसूयापरोभूद्वीर्योदग्रे राजशब्दे मृगेषु ६५
तान्हत्वा गजकुलबद्धतीव्रवैरान्काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् आत्मानं
ग. रणकृतकर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त ६६ चमरान्परितः प्रवर्तिता
श्वः क्वचिदाकर्णनिकृष्टभल्लवर्षी नृपतीनिव तान्वियोज्य सद्यः सितबालव्यजनै
र्जगाम शान्तिं ६६ अपि तुरगसमीपादुत्पतन्तं मयूरं न स रुचिरकलापं बाणलक्ष्यी

चकार स पदिगतमनस्कास्त्रीव माल्यानुकीर्णरति विग्रहितवंधे केशपाशोप्रियायाः ७८
तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालके आचचाम सतुषारशीतलो
भिन्नपल्लवपुटो वनानिलः ७९ इति विस्मृतान्यकरणीयमात्मनः सचिवावलंवि
तधुरं धराधिपं परिवृद्धरागमनुवद्धसेवया मृगया जहार चतुरेव कामिनी ८० सुल
लितकुसुमप्रवालशय्यां ज्वलितमहौषधिदीपिकासनाथं नरपतिरतिवाहयांव
भूव क्वचिदसमेतपरिग्रहस्त्रियामां ८१ उषसि गजयूथकर्णतालैः पटुपटहध्व
निभिर्विनीतनिद्रः अरमतमधुरस्वराणीमं शृण्वन्विहगविकूजितवंदिमंगलानि
८२ अथ जातुरुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः श्रमफेनमुचा त
पस्विगाढां तमसां प्राप नदीं तुरंगमेण ८३ कुंभपूरणभवः पटुरुच्चैरुच्चचार श्रीव

निनदोंभसि तस्याः तत्र स द्विरदवृंहितशंकी शब्दपातिनमिषुं विससर्ज ८४ नृपतेः प्रतिषिद्ध
मेव यत्कृतवान्पंक्तिरथो विलंघ्य यत् अपथे पदमर्पयंति हि श्रुतवंतोपि रजोनिमी
लिताः ८५ हा तातेति क्रंदितमाकर्ण्य विषण्णस्तस्यान्विष्यन्वेतसगूढं प्रभवं सः श
ल्यप्रोतं प्रेक्ष्य सकुंभं मुनिपुत्रं तापादंतःशल्य इवासीत् क्षितिपोपि ८६ तेनावतीर्य तु
रगात्प्रथितान्वयेन पृष्टान्वयः स जलकुंभनिषण्णदेहः तस्मै द्विजेतरतपस्विसुतः स्खलद्
भिरात्मानमक्षरपदैः कथयांवभूव ८७ तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सका
शमवसन्नदृशोर्निनाय ताभ्यां तथाविधमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं न्रपतिः स्व
चरितं न्रपतिः शशंस ८८ तौ दंपती वहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहर
यतामुरस्तः सोभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः ८९

५७

दिष्टांतमाप्स्यति भवानपि पुत्रशोकादंते वयस्य हमिवेति तमुक्तवंतं आक्रांतपूर्वमिव मु
क्तविषं भुजंगं प्रोवाच कोशलपतिः प्रथमापराधः ७९ शापोप्यदृष्टतनयाननपद्मशो
भे सानुग्रहो भगवता मयि पातितोयं कृष्यां दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोह
जननीं ज्वलनः करोति ८० इत्थंगते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो
न वसुधाधिपेन एधान्हुताशवतः स मुनिर्ययाचे पुत्रं परासुमनुगंतुमनाः सदारः ८१
प्राप्तानुगः सपदि शासनमस्य राजा संपाद्य पातकविलुप्तधृतिर्निवृत्तः अंतर्निविष्ट
पदमात्मविनाशहेतुं शापं दधज्ज्वलनमौर्वमिवांबुराशिः ८२ इति श्रीरघुवंशे महाका
व्ये कालिदासकृतौ दशरथमृगयाविहारो नाम नवमः सर्गः ९ ॥ पृथिवीं शासतस्त
स्य पाकशासनतेजसः किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥१॥ न चोपलेभे पूर्वे रा व

५७

षामृणनिर्मोक्षसाधनं सुताभिधानं स ज्योतिः सद्यः शोकतमोपहं २ अतिष्ठत्प्रत्यया
पेक्षसंततिः स चिरं नृपः प्राङ्मंथादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ३ ऋष्यशृंगा
दयस्तस्य संतः संतानकांक्षिणः ॥ आरेभिरे यतात्मानः पुत्रीयामिष्टिमृत्विजः ४ त
स्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिं अभिजग्मुर्निदाघार्त्ताश्छायावृक्षमिवाध्वगाः
५ ते च प्रापुरुदन्वंतं बुबुधे चादिपूरुषः अव्याक्षेपो भविष्यंत्याः कार्यसिद्धेर्हि लक्षणं ६
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः तत्फणामंडलोदर्चिर्मणिद्योतितविग्रहं ७
श्रियः पद्मनिषण्णायाः क्षौमांतरितमेखले अंके निक्षिप्तचरणमास्तीर्णकरपल्लवे ८
प्रबुद्धपुंडरीकाक्षं बालातपनिभांशुकं दिवसं शारदमिव प्रारंभसुखदर्शनं ९ प्रभा
नुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणं कौस्तुभाख्यमपां सारं बिभ्रतं बृहतोरसा १० बा

ऊर्मिर्विकटपाकारैर्दिव्याभरणभूषितैः आविर्भूतं पयोमध्यात्तारिजातमिवापरं ११ दैत्यस्त्री
गंडलेखानां मदरागविलोपिभिः आयुधैश्चेतनावद्भिरुदीरितजयस्वनं १२ मुक्तशेष
विरोधेन कुलिशव्रणलक्ष्मणा उपस्थितं प्रांजलिना विनीतेन गरुत्मता १३ योगनि
द्रांतविशदैः पावनैरवलोकनैः भृग्वादीननुगृह्णंतं सौखशायनिकानृषीन् १४ आदिकु
र्वन्॥ प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरं १५ न
मो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने १६ रसांत
राण्येकरसं यथा दिव्यं पयोश्नुते देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः १७ हृदयस्थ
मनासन्नमकामं त्वां तपस्विनं दयालुमनघस्पृष्टं पुराणमजरं विदुः १८ अमेयो मित
लोकस्त्वमनर्थी प्रार्थनावहः अजितो जिष्णुरत्यंतमव्यक्तो व्यक्तकारणं १९ एकः कार
णतस्तां तामवस्थां प्रतिपद्यसे नानात्वं रागसंयोगात् स्फटिकस्येव ते स्मृतं २०

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्
२१ सप्तसामोपगीतं त्वां सप्तार्णवजलेशयं सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्र
यं २२ चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः चतुर्वर्णमयो लोकस्त्वत्तः सर्वं च
तुर्मुखान् २३ अभ्यासनिगृहीतेन मनसा हृदयाश्रयं ज्योतिर्मयं विचिन्वंति योगि
नस्त्वां विमुक्तये २४ अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः॥ स्वपतो जागरूकस्य
याथार्थ्यं वेद कस्तव २५ शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः पर्याप्तोसि प्रजाः पातु
मौदासीन्येन वर्त्तितुं २६ बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः त्वय्येव निप
तंत्योघा जाह्नवीया इवार्णवे २७ त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां ग
तिस्त्वं वीतरागाणामभूयःसंनिवृत्तये २८ प्रत्यक्षोप्यपरिच्छेद्यो मह्यादिर्महि

मावं आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा २९ केवलं स्मरणेनापि पुनासि पुरु
षं यदा अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ३० उदधेरिव रत्नानि तेजांसीव
विवस्वतः स्तुतिभ्यो व्यतिरिच्यंते दूरेण चरितानि ते ३१ अनवाप्तमवाप्तव्यं न ते किं
चनाविद्यते लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ३२ महिमानं यदुत्कीर्त्य
तव संह्रियते वचः श्रमेण तदशक्त्या वा न गुणानामियत्तया ३३ इति प्रसादया
मासुस्ते सुरास्तमधोक्षजं भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ३४ तस्मै
कुशलसंप्रश्नव्याजेन प्रीतये सुराः भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः ३५
अथ वेलासमासन्नशैलरंध्रानुवादिना स्वरेण भगवानाह परिभूतार्णवध्वनिः
३६ पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता बभूव पदसंस्काराच्चरितार्थैव सर

स्वती ३७ बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता निर्यातशेषा चरणाद्गंगेवोर्द्ध्वप्रव
र्त्तिनी ३८ जाने वो रक्षसाक्रांतावनुभावपराक्रमौ अंगिनां तमसेवोभौ गुणौ
प्रथममध्यमौ ३९ विदितं तप्यमानं च तेन मे भुवनत्रयं अकामोपनतेनेव सा
[illegible]धोर्हृदयमेनसा ४० कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा स्व
यमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ४१ स्वासिधारापरिहृतः कामं चक्रस्य तेन मे स्था
पितो दशमो मूर्द्धा लभ्यांश इव रक्षसा ४२ स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः अ
त्यारूढं रिपोः सोढं चंदनेनेव भोगिनः ४३ धातारं तपसा प्रीतं ययाचे स हि राक्षसः दैवा
त्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ४४ सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमं करिष्या
मि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयं ४५ अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः मा

रघुवंस
६०

याविभिरनालीकमादास्य ध्वोनिशाचरैः ४६ वैमानिकाः पुण्यकृतस्त्यजंतु मरुतां पथि पुष्पका
लोकसंक्षोभं मेघावरणतत्पराः ४७ मोक्ष्यध्वे सुरबंदीनां वेणीर्वीर्यानदूषिता न शापयं
त्रितपौलस्त्यबलात्कारकचग्रहैः ४८ रावणावग्रहक्लांतमिति वागमृतेन सः अभिवृ
ष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ४९ पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः अंशैरनुयय
युर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ५० अथ तस्य विशांपत्युरंते काम्यस्य कर्मणः पुरुषः प्र
बभूवाग्नेर्विस्मयेन सहर्त्विजां ५१ हेमपात्रीकृतं दोर्भ्यामादधानः पयश्चरुं अनुप्रवेशा
दाद्यस्य पुंसस्तेनापि दुर्वहं ५२ प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः वृषेव पयसां
सारमाविष्कृतमुदन्वता ५३ अनेनैकार्थिता राज्ञो गर्भोस्तस्योन्यदुर्लभाः प्रसूतिं स्रू
चकमे तस्मिन्नैत्रैलोक्यप्रभवोपि यत् ५४ स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितं रीव

त्रैलोक्यप्रभवः विष्णुः तस्मिन्नरा ह्रूपस्तुतिं चकमे १
द्यापत्न्यो... न्यपुरुषेन प्राप्तः २
विभाजेन दत्तवान १
६

पद्मदत्तार
स्य... ...
नाति... १
कः केकया...
मिव १

पत्न्योर्महीभृतः। चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे ५७
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपं ५५ अर्चिता तस्य कौशल्या प्रिया केकयवंश
जा अतः संभाविता ताभ्यां सुमित्रामैच्छदीश्वरः ५६ ते बहुज्ञस्य चि[illegible] पत्न्यौ [illegible]
[illegible] प्रेमरीवारणस्येव मदनिष्यंदलेखयोः ५८ ता अभिगर्भं प्रजाभूत्यै दधिरे देवांशसंभ
वं सौरीभिरिवनाडीभिरमृताख्याभिरंबुयैः ५९ सममापन्नसत्वास्ता रेजुरापांडुरत्विषः अं
तर्गतफलारंभाः सस्यानामिव संपदः ६० गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः असि
शेखगदाशार्ङ्गचक्रलांछितमूर्तिभिः ६१ हेमपक्षप्रभाजालं गगने च वितन्वता उह्यमानाः सु
पर्णेन वेगाकृष्टपयोमुचा ६२ बिभ्रत्या कौस्तुभन्यासं स्तनांतरविलंबिनं पर्युपास्यं
त लक्ष्म्या च पद्मव्यजनहस्तया ६३ कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ब्र
ह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ६४ ताभ्यस्तथाविधान्स्वप्नान्श्रुत्वा प्रीतो हि

ताः सर्वाः स्त्रियः स्वप्नेषु परं ब्रह्म... ॥ कलापकं ॥
... किञ्चित्

अनेकधाप्रकारेण २ सर्वात्मकः १ चन्द्रबिंबः ३ विभुः १ आकाशः ३

पार्थिवः मेनैपराह्णीमालानं गरुडेन जगद्गुरोः ६५ विभक्तात्मा विभुस्तासामेकः कुक्षि
ष्वनेकधा उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ६६ अथाग्रमहिषी राज्ञः प्रसूति
समये सती पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ६७ राम इत्यभिरामेण वपुषा
तस्य नोदितः नामधेयं गुरुः चक्रे जगत्प्रथममङ्गलं ६८ रघुवंशप्रदीपेन तेनाप्र
तिमतेजसा रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ६९ शय्यागतेन रामेण माता
शातोदरीव बभौ सैकतं भोजबलिना जाह्नवीव शरत्कृशा ७० कैकेय्यास्तनयो
जज्ञे भरतो नाम शीलवान् जनयित्रीमलं चक्रे यः प्रश्रय इव श्रियं ७१ सुतौ लक्ष्मण
शत्रुघ्नौ सुमित्रा सुषुवे यमौ सम्यगाराधिता विद्या प्रबोधविनयाविव ७२ नि
र्दोषमभवत्सर्वमाविष्कृतगुणं जगत् अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमं ७३

अंधकारस्य दूरीकृतः ३ — न प्रेरितः ४ — गर्भमोचनेन कृशोदरी — जज्ञे नाम जाता ३ — प्रकटीकृतगुण १ — कौशल्या ५ — पुत्रः ४ — यः पुत्रः ३ — श्रियं — पुरुषोत्तमावे

नाम केर्थः नाम्ना सैकतं नाम रेणुका तत्र भोजबलिना भोज कमलः तस्य बलिः काशिवर — यमौ केर्थः जुगुल्मौ नाम शोभितः

तस्योदये चतुर्मूर्त्तेः पौलस्त्यचकितेश्वराः विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव
७४ कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः रक्षो विप्रकृतावास्तामपविद्धशुचावि
व ७५ दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः मणिव्याजेन पर्यस्ताः पृथिव्यामश्रु
बिन्दवः ७६ पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः आरम्भं प्रथमं चक्रुर्देवदुन्दुभ
यो दिवि ७७ सन्तानकमयी वृष्टिर्भवने तस्य पेतुषी सन्मङ्गलोपचाराणां सैवादिरच
नाऽभवत् ७८ कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः आनन्देनाग्रजेनेव स
मं ववृधिरे पितुः ७९ स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा मूर्छितं सहजं तेजो
हविषेव हविर्भुजां ८० परस्पराविरुद्धास्ते तद्रघोरनघं कुलं अलमुद्द्योतयामासु
र्देवारण्यमिवर्त्तवः ८१ समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ तथा भरतश

उभयोप्रीत्यादिदंवभूवतुः ८२ तेषांद्वयोर्द्वयोरैक्यंविभिदेनकदाचन यथावायुविभाव
स्वोर्यथाचंद्रसमुद्रयोः ८३ तेप्रजानांप्रजानाथास्तेजसाप्रश्रयेणच मनोजह्रु
निदाघांतेश्यामाभ्रादिवसाइव ८४ सचतुर्धाबभौव्यस्तःप्रसवःपृथिवीपतेः धर्मार्थका
ममोक्षाणांअवतारइवांगवान् ८५ गुणैराराधयामासुस्तेगुरुंगुरुवत्सलाः तमे
वचतुरंतेशंरत्नैरिवमहार्णवाः ८६ सुरगजइवदंतैर्भग्नदैत्यासिधारैर्नयइवपण
वंधव्यक्तयोगैरुपायैः हरिरिवयुगदीर्घैर्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनांतैश्च
कासेचतुर्भिः ॥ ८७ ॥ इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतौरामोत्पत्ति
नामदशमसर्गः ॥ १० ॥ कौशिकेनसकिलक्षितीश्वरोराममध्वरविघातशांतये ॥

काकपक्षधरमेत्ययाचितस्तेजसांहिनवयःसमीक्षते १ कृच्छ्रलब्धमपिमेदनीपतिसं
दिदेशमुनयेसलक्ष्मणं अप्यसुप्रणयिनोरघोःकुलेनव्यहन्यतकदाचिदर्थिता २
यावदादिशतिपार्थिवस्तयोर्निर्गमायपुरमार्गसंक्रियां तावदाशुविहितामरुत्सखै
सांपुष्पजलवर्षिभिर्घनैः ३ तौनिदेशकरणोद्यतौपितुर्धन्विनौपेततुः भूपते
रपितयोःप्रवत्स्यतोर्नम्रयोरुपरिवाष्पबिंदवः ४ तौपितुर्नयनजेनवारिणाकिंचिदु
क्षितशिखंडिकावुभौ धन्विनौतमृषिमन्वगच्छतांपौरदृष्टिकृतमार्गतोरणौ ५
लक्ष्मणानुचरमेवराघवंनेतुमैच्छदृषिरित्यसौनृपः आशिषंप्रयुयुजेनवाहिनींसा
हिरक्षणेतयोःक्षमा ६ मातृवर्गचरणस्पृशौमुनेस्तौप्रपद्यपदवींमहौजसः रेजतुर्गति

रघुवंश

६३

वशात्प्रवर्त्तितौ भास्करस्य मधुमाधवाविव ७ वीचिलोलभुजयोस्तयोर्गतं शैशवाच्च
पलमप्यशोभत तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितं ८ तौ बलातिब
लयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरि
वर्त्तिनाविव ९ पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः उह्यमान इव वाह
नोचितः पादचारमपि न व्यभावयत १० तौ सरांसि रसवद्भिरंबुभिः कूजितैः श्रुतिसुखैः पतत्
त्रिणः वायवः सुरभिपुष्परेणुभिः छायया च जलदाः सिषेविरे ११ नांभसां कमलशोभिनां
तथा शाखिनां न परिश्रमच्छिदां दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः
१२ स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः विग्रहेण मदनस्य चा शिव

६३

रुणा सोऽभवत्प्रतिनिधिर्न कर्मणा १३ तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया प
थि निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यतां १४ ज्यानिनादमथ गृह्ण
ती तयोः प्रादुरास बहुलक्षपाछविः ताडका चलकपालकुंडला कालिकेव निबिडबलाकि
नी १५ तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया अभ्यभावि भरताग्रजस्तया
वात्ययेव पितृकाननोत्थया १६ उद्यतैकभुजयष्टिमायतीं श्रोणिलंबिपुरुषांत्रमेखलां ता
विलोक्य वनितावधे घृणां पत्रिणा सह मुमोच राघवः १७ यच्चकार विवरं शिलाघने ताड
कोरसि स रामसायकः अप्रविष्टविषयस्य रक्षसां द्वारतामगमदंतकस्य तत् १८ बाणभि
न्नहृदया निपेतुषी सा स्वकाननभुवं न केवलं विष्टपत्रयपराजयस्थिरां रावणश्रियम

रघुवंश नेः प्रापदस्त्रमवदानतोषितात् ज्योतिरिंधननिपाति भास्करात्सूर्यकांतमिव ताटकांतकः २१ व र

६४ पिय्यकेपयत् १९ राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी गंधवद्रुधिरचंदनोक्षि
ताजीवितेशवसतिं जगाम सा २० नैऋतघ्नमथमंत्रक्रमेमनाश्रमपदं ततः परं पावनं श्रु
तमृषेरुपेयिवान् उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः २२ आससाद मुनि
रात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणं बद्धपल्लवपुटांजलिद्रुमं दर्शनोन्मुखमृगं त
पोवनं २३ तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः लोकमंधतमसात्क्र
मोदितौ रश्मिभिः शशिदिवाकराविव २४ वीक्ष्य वेदिमथ रक्तबिंदुभिर्बंधुजीवपृथुभिः प्रदूषि
तां संभ्रमोभवदपोढकर्मणामृत्विजां च्युतविकंकतस्रुचां २५ उन्मुखः सपदि लक्ष्मणाग्रजो बा
णमाश्रयमुखात्समुद्धरन् रक्षसां बलमपश्यदंबरे गृध्रपक्षपवनेरितध्वजं २६ तत्र यावधि ६४

धिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान् किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रव
र्तते २७ सोस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतं तेन शैलगुरुमप्यपातयत्पांडुप
त्रमिव ताडकासुतं २८ यः सुबाहुरिति नाम राक्षसः तत्र तत्र विससर्प मायया तं क्षुरप्रशकली
कृतं कृती पत्रिणां व्यभजदाश्रमाद्बहिः २९ इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनंद्य विक्र
मं ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन्क्रियाः ३० तौ प्रणामचलकाकपक्षकौ
भ्रातरावभृथाप्लुतो मुनिः आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना ३१ तं न्यमं
त्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलं ३२
व तौ शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत येषु दीर्घतपसः परिग्रहो वासवक्षणक
लत्रतां ययौ ३३ प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलामयी स्वं वपुः स किल किल्बि

षच्छिदां रामपादरजसामनुग्रहः ३४ राघवान्वितमुपस्थितं ततो निशम्य जनको जनेश्व
रः अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ३५ यूपवत्यवसिते क्रियाविधौ का
लवित्कुशिकवंशवर्धनः राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः ३६ तौ वि
देहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वं
चनां मनः ३७ तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः स्वं विचिंत्य च धनुर्दुरा
नमं पीडितो दुहितृशुल्कसंस्थया ३८ अब्रवीच्च भगवन्मतंगजैर्यद्बृहद्भिरपि कर्म दुष्करं
तत्र नाहमनुमंतुमुत्सहे मोघवृत्ति कलभस्य साहसं ३९ ह्रेपिता हि बहवो नरेश्वरास्तेन त
त धनुषा धनुर्भृतः ज्यानिघातकठिनत्वचो भुजान्विधूय धिगिति प्रतस्थिरे ४० प्रत्युवा

च तमृषिर्निशम्यतां वीर्यतायमथवा कृतं गिरा चाप एव भवतो भविष्यति व्यक्तशक्तिरशनि
र्गिराविव ४१ एवमाप्तवचनात्स पौरुषं काकपक्षधरेपि राघवे श्रद्दधे त्रिदशगोपमात्रके
दाहशक्तिमिव कृष्णवर्त्मनि ४२ व्यादिदेश गणशोथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ४३ आत्तयाथ जनकस्य पार्श्वगाः प्रेम
पुरपरिफुल्लचक्षुषः आनयन्निमुदिता स्मतद्धनुर्दुर्वहं चटुलशारवतया ४४ तत्प्रसुप्तभुज
गेंद्रभीषणं प्रेक्ष्य दाशरथिराददे धनुः विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्व
जः ४५ आततज्यमकरोच्च संसदा विस्मितास्तिमितनेत्रमीक्षितः शैलसारमपि नातिय
त्नतः पुष्पचापमिव कोमलं स्मरः ४६ भज्यमानमतिमात्रकर्षणात्तेन वज्रपरुषस्वनं
धनुः भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत् ४७ मैथिलः सपदि संगरो

राघवायतनयामयोनिजां साक्षिवीकृतिमतस्तपोनिधेरग्निसाक्षिकमिवातिसृष्टवान् ४८
प्राहिणोच्चमहितं महाद्युतिः कोशलाधिपतये पुरोधसं भृत्यभाविदुहितुः परिग्रहादिश्य
तांकुलमिदंमेरिति ४९ अन्वियेषसदृशीं स च स्नुषां प्राप चैनमनुकूलवाग्द्विजः सद्य एव
सुकृतां हि पच्यते कल्पवृक्षफलधर्मिकांक्षितं ५० तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान्
वचनमग्रजन्मनः उच्चचाल वलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः ५१ आ
ससाद मिथिलां स वेष्टयन् पीडितोपवनपादपां बलैः प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कांत
परिभोगमायतं ५२ तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ कन्यकातन
यकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ५३ पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजा
मथोर्मिलां यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ५४ ते चतुर्थसहिता

स्त्रयो बभुः सूनवो नववधूपरिग्रहाः सामदानविधिभेददण्डजाः सिद्धिमंत इव तस्य भूपतेः ५५
ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन्कृतार्थतां सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियो
गसन्निभः ५६ एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोपि तत्र सः अध्वसु त्रिषु विसृष्टमैथिलः
स्वां पुरीं दशरथो न्यवर्तत ५७ तस्य जातु मरुतः प्रतीपगा वर्त्मनि ध्वजतरुप्रमाथिनः चिक्लि
शुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीं ५८ लक्ष्यते स्म तदनंतरं रविर्बद्धभीम
परिवेषमंडलः वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ५९ श्येनपक्षपरि
धूसरालकाः सांध्यमेघरुधिरार्द्रवाससः अंगना इव रजस्वला दिशो नो बभूवुरवलोकनक्षम
क्षमाः ६० भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववाशिरे क्षत्रशोणितपितृ

इति

रघुवंशम्

कालिदासप्रणीतम् १६/12